"स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसु-
र्द्यूते रात्रिरियं जिता कमलया देवी प्रसाद्याद्य च ।
इत्यन्तःपुरसुन्दरीः प्रति यया विज्ञाय विज्ञापिते
देवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थितं[3] नाडिकाः ॥"

शठः—

गूढविप्रियकारी तु शठ इत्युच्यते यथा ।

"शठान्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा
यदाश्लिष्यन्नेव प्रशिथिलभुजग्रन्थिरभवः ।
तदेतत्काचक्षे घृतमधुमयत्वद्बहुवचो-
विषेणाघूर्णन्ती किमपि न सखी मे गणयति ॥"

धृष्टः—

व्यक्तान्यासङ्गचिह्नः स्याद् धृष्टो वितथवाग्यथा[4] ॥ ११ ॥

"तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते ।

[1] शृङ्गारावस्थासु G. 1.
[2] स उक्तः G. 1.
[3] स्थिताः A.
[4] विगतवाग्यथा U.

इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया
साश्लिष्टा रभसेन तत्सुखवशात्तन्व्या च तद्विस्मृतम् ॥"

अनुकूलः—

अनुकूलस्त्वेकरसोऽनन्यासङ्गमविद्यथा ।

"विभवेऽपि सति त्वया विना सुखमेतावदजस्य गण्यताम् ।
अहृतस्य विलोभनान्तरैर्मम सर्वे विषयास्त्वदाश्रयाः ॥"

षोडशविधा नायकाः—

इत्युदात्तादिनेतॄणां भेदाः षोडश कीर्तिताः ॥ १२ ॥

पुनस्त्रिविधा नायकाः—

ज्येष्ठमध्याधमत्वेन तेषामेव त्रिरूपता ।

अष्टचत्वारिंशद्विधा नायकाः—

एवं नेतृभिदास्त्वष्टचत्वारिंशत्प्रकीर्तिताः ॥ १३ ॥

नायकसहायाः—

[1]पीठमर्दो विटविदूषकौ नेतृसहायकाः ।

पीठमर्दः—

पीठमर्दः कार्यदक्षः किंचिदूनगुणस्ततः ॥ १४ ॥

विटः—

नेतृचित्तानुकूलैकविद्यो विट इतीरितः ।

विदूषकः—

विदूषकः प्रसङ्गेषु नेतृहास्यकरो मतः ॥ १५ ॥

[1] पीठमर्दविटविदूषकाः; P.

प्रतिनायकाः—

लुब्धो धीरोद्धतः स्तब्धः पापकृत्प्रतिनायकाः ।
यौवने [1]सत्त्वसंभूताः पुंसां शोभादयो गुणाः ॥ १६ ॥
शोभा विलासो माधुर्यं गाम्भीर्यं स्थैर्यतेजसी ।

नायकविशेषगुणाः—

ललितौदार्यमित्यष्टौ तेषां लक्ष्माभिधीयते ॥ १७ ॥

शोभा—

नीचैर्गुणाधिकैः[2] स्पर्धा शोभायां शौर्यदक्षते ।

विलासः—

गतिः सधैर्या दृष्टिश्च विलासे सस्मितं वचः ॥ १८ ॥

माधुर्यम्—

श्लक्ष्णो विकारो माधुर्यं संक्षोभेऽतिमहत्यपि ।

गाम्भीर्यम्—

गाम्भीर्यं यत्प्रभावेण विकारो नोपलभ्यते ॥ १९ ॥

स्थैर्यम्—

व्यवसायादचलनं स्थैर्यं विघ्नकुलादपि[3] ।

तेजः—

अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपि ॥ २० ॥

ललितम्—

शृङ्गाराकारचेष्टत्वं सहजं ललितं मृदु ।

[1] सति A. [2] नोचैर्घृणाधिकैः P. [3] शतादपि P.

औदार्यम् —

प्रियोक्त्या जीवितादानमौदार्यं सदुपग्रहः ॥ २१ ॥

त्रिविधा नायिकाः—

स्वान्या साधारणा चेति तद्गुणा नायिकास्त्रिधा[1] ।

स्वीया—

स्वीया शीलार्जवयुता लज्जायुक्ता सती यथा ॥ २२ ॥

" शुश्रूषस्व [2]गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
[3]भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने [4]भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥ "

अन्या—

अन्यान्योढा कन्यका च नान्योढाङ्गिरसे क्वचित् ।
कन्यानूढा स्वेच्छयास्यां रागोऽङ्गाङ्गिरसे यथा ॥ २३ ॥

" एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥ "

साधारणा—

साधारणा स्याद्गणिका कलाप्रागल्भ्यधौर्त्ययुक्[5] ।
रक्तेव रञ्जयेदाढ्यान् निःस्वान्निर्वासयेद्यथा ॥ २४ ॥

" यदा येन समायुक्ता तदा तद्रागरूषिता ।
वियुक्ता स्वरुचिं धत्ते वेश्या किं स्फाटिकी शिला ॥ "

[1] नायिका त्रिधा U. [2] गुरु A. [3] भर्त्रा U. [4] भोगेषु A. [5] धैर्ययुक् P

स्वाभाविकमिदं तासां लक्षणं रूपकेषु तु ।
रक्तेव तत्प्रहसने नैषा दिव्यनृपाश्रये ॥ २५ ॥

त्रिविधा स्वीया—

स्वीया तु मुग्धा मध्या च प्रगल्भेति त्रिधा मता ।

स्वीयमुग्धा—

मुग्धा नववयःकामा रतौ वामाल्पकृद्यथा ॥ २६ ॥

"अङ्कूरत्कुचमङ्गमायतदृशः स्वान्तं विशन्मन्मथं
रोहद्रोमलतं [1]वलग्नमलिकं व्यालोलनीलालकम् ।
अङ्गीकारपराङ्मुखं रतमनायासापनोद्यक्रमः
कोपो यस्य विलासिनः सुकृतिनामेकः स एवाग्रणीः ॥"

स्वीयमध्या—

मध्योदितवयःकामा मोहान्तसुरता यथा ।

"धन्यासि या कथयसि प्रियसंगमेऽपि
विस्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति [2]प्रणिहिते तु करे प्रियेण
सख्यः शपामि [3]न हि किंचिदपि स्मरामि ॥"

स्वीयप्रगल्भा—

अत्यारूढवयःकामा प्रगल्भा प्रियवक्षसि ॥ २७ ॥
विलीयमानेव रतारम्भेऽप्यस्ववशा यथा ।

"गाढालिङ्गनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलत्काञ्चीनितम्बाम्बरा ।

[1] विलग्नं P. [2] प्रणिहितश्च करः P, प्रणिहिते च U. [3] यदि U.

मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम् ॥"

त्रिविधा मध्या—

मध्या स्यात् त्रिविधा धीरा धीराधीरेतरेति च ॥ २८ ॥

मध्यधीरा—

धीरा सोत्प्रासवक्रोक्त्या सागसं खेदयेद्यथा[1] ।

"स्विन्नमातपभरेण ते मुखं वायुना विलुलिताः शिरोरुहाः ।
क्लान्तमङ्गमपि मार्गसंभ्रमात्तावदास्स्व सुभगात्र मा विश ॥"

मध्यधीराधीरा—

साश्रुसोत्प्रासवक्रोक्त्या धीराधीरा भवेद्यथा ॥ २९ ॥

"बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
[2]खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि ।
तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥"

मध्याधीरा—

साश्रुनिष्ठुरभाषाभिरधीरा सागसं यथा ।

"यातु यातु किमनेन तिष्ठता मुञ्च मुञ्च सखि मादरं कृथाः ।
खण्डिताधरकलङ्कितं खलं शक्नुमो न नयनैर्निरीक्षितुम् ॥"

त्रिविधा प्रगल्भा—

प्रगल्भापि त्रिधा धीराधीरेतरेति च ॥ ३० ॥

[1] खेलयेद्यथा A. [2] दोषो P.

प्रगल्भधीरा—

सावहित्थादरोदास्ते सुरते विहितागसम् ।
प्रगल्भधीरा दयितं खेदयेत्कुपिता यथा ॥ ३१ ॥

"एकत्रासनसंगतिः[1] परिहृता प्रत्युद्गमाद् दूरत-
स्ताम्बूलानयनच्छलेन रभसाश्लेषोऽपि संविघ्नितः ।
आलापोऽपि न मिश्रितः परिजनं व्याहारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥"

"आयस्ता कलहं पुरेव कुरुते न स्रंसने वाससो
भुग्नभ्रूगति खण्ड्यमानमधरं धत्ते न केशग्रहे ।
[2]अङ्गान्यर्पयति स्वयं भवति नो वामा हठालिङ्गने
तन्व्या शिक्षित एष संप्रति [3]कुतः कोपप्रकारोऽपरः ॥"

प्रगल्भधीराधीरा—

प्रगल्भधीराधीरा तु वक्रसोत्प्रासवाग्यथा ।

"कोपो यत्र भ्रुकुटिरचना विग्रहो यत्र मौनं
यत्रान्योन्यस्मितमनुनयो दृष्टिपातः प्रसादः ।
तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं
त्वं पादान्ते लुठसि न च मे मन्युमोक्षः खलायाः[4] ॥"

प्रगल्भाधीरा—

अपि प्रगल्भाधीरा संतर्ज्य संताडयेद्यथा ॥ ३२ ॥

[1] संस्थितिः P.
[2] अङ्गं नार्पयति P.
[3] पुनः A. U.
[4] प्रियायाः A.

"कोपात्कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं
नीत्वा [1]मोहनमन्दिरं दयितया सायं सखीनां पुरः ।
भूयो नैवमिति स्खलन्मृदुगिरा संसूच्य दुश्चेष्टितं
धन्यो हन्यत एव निह्नुतिपरः प्रेयान् रुदत्या हसन् ॥"

षड्विधा मध्या—

ज्येष्ठाकनिष्ठाभेदेन पुनर्मध्या तु षड्विधा ।

षड्विधा प्रगल्भा—

प्रगल्भापि पुनस्ताभ्यां भेदाभ्यां षड्विधा यथा ॥ ३३ ॥

"दृष्ट्वैकासनसंगते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलात्[2] ।
ईषद्वक्रितकंधरः सपुलकप्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥"

अष्टौ नायिकावस्थाः—

आसामष्टाववस्थाः स्युः स्वाधीनपतिकादिकाः[3] ।
स्वाधीनपतिकाद्या च[4] तथा वासकसज्जिका ॥ ३४ ॥
कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका ।
विरहोत्कण्ठिता चैव खण्डिता चाभिसारिका ॥ ३५ ॥

स्वाधीनपतिका—

आसन्नायत्तरमणा स्वाधीनपतिका यथा ।

"मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति ।

[1] वासनिकेतनं P.
[2] छलः A.
[3] दयः A. U.
[4] चाद्या A.

अन्यापि किं [1]सखि न भाजनमीदृशीनां
वैरी न चेद्भवति वेपथुरन्तरायः ॥"

वासकसज्जिका—

एष्यत्प्रिया मुदा वासकसज्जालंकृता यथा ॥ ३६ ॥

"विमुक्तमालिन्यविशेषकान्तिरामुक्ततारामलचारुहारा[2] ।
स्फीताम्बरा प्रीतिमुपैति काचिदुदेष्यतीन्दौ सति यामिनीव ॥"

कलहान्तरिता—

विधूय दयितं चार्ता कलहान्तरिता यथा ।

"अनुकूलजनोऽनुनेतुकामः [3]परुषे पादनतो गतोऽवधूतः[4] ।
शिशिरं सलिलं शिखाभिरग्नेर्निहतं किं न गुणं निजं जहाति ॥"

विप्रलब्धा—

विमानिता विप्रलब्धा नायाते समयं यथा ॥ ३७ ॥

"उत्तिष्ठ दूति यामो यामो यातस्तथापि नायातः ।
[5]मिथ्याप्रलापशीले विश्वासः कुत्र धूर्तेऽस्मिन् ॥"

प्रोषितभर्तृका—

देशान्तरगते प्रोषितप्रिया दयिते यथा ।

"उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।

[1] न सखि P. [2] तारहारा U. [3] परुषैः U. [4] विधूत A.
[5] The Das'arūpaka reads the second half thus :
यातः परमपि जीवेज्जीवितनाथो भवेत्तस्याः । (Pa. 2.)

तन्वीमार्द्रां नयनसलिलैः सारयित्वा कथंचि-
द्भूयो भूयः स्वयमधिकृतां मूर्च्छनां विस्मरन्ती ॥"

विरहोत्कण्ठिता—

चिरयत्यव्यलीके तु विरहोत्कण्ठिता यथा ॥ ३८ ॥

"सखि स विजितो वीणावाद्यैः कयाप्यमरस्त्रिया[1]
पणितमभवत्ताभ्यां तत्र क्षपा ललिता[2] ध्रुवम् ।
कथमितरथा शेफालीषु स्फुरत्कुसुमास्वपि
प्रसरति नभोमध्येऽपीन्दौ प्रियेण विलम्ब्यते ॥"

खण्डिता—

खण्डितेर्ष्यावती ज्ञातस्मरचिह्ने प्रिये यथा ।

"नवनखपदमङ्गं गोपयस्यंशुकेन
स्थगयसि पुनरोष्ठं पाणिना दन्तदष्टम् ।
प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्पन्
नवपरिमलगन्धः केन शक्यो वरीतुम् ॥"

अभिसारिका—

सरेद्वा सारयेद्वाभिसारिका कामुकं यथा ॥ ३९ ॥

"[3]प्रशिथिलनिजलज्जाः प्राङ्मुखं वीक्षमाणा-
स्तिमिरविरतिभीतास्तूर्णमुत्तीर्णमार्गाः ।
[4]वलयचलनलोला वञ्चितात्मीयलोकाः
सततमभिसरेयुः सागसोऽप्यात्मनाथान् ॥"

[1] अपरस्त्रिया U. [2] ललितं U. [3] प्रचलित P. [4] वलयवलन U.

नायिकादूत्यः—

आसां दूत्यः सखी दासी धात्रेयी [1]प्रतिवेशिनी ।
लिङ्गिनी शिल्पिनी कारुः स्वयं वा तदसंभवे ॥ ४० ॥

" [2]मातः कं हृदये निधाय सुचिरं रोमाञ्चिताङ्गी मुहु-
र्जृम्भामन्थरतारकां विलुलितापाङ्गां दधाना दृशम् ।
सुप्तेवालिखितेव शून्यहृदया रेखावशेषीभव-
स्यात्मद्रोहिणि किं ह्रिया कथय मे गूढो निहन्ति स्मरः ॥ "

नायिकालंकाराः—

यौवने सत्त्वजाः स्त्रीणामलंकारास्तु विंशतिः ।
भावो हावश्च हेला च त्रयोऽप्यङ्गसमुद्भवाः ॥ ४१ ॥
शोभा कान्तिस्तथा दीप्तिर्माधुर्यं च प्रगल्भता ।
औदार्यं धैर्यमित्येते सप्तायत्नसमुद्भवाः[3] ॥ ४२ ॥
लीला विलासो विच्छित्तिर्विभ्रमः किलिकिञ्चितम् ।
मोट्टायितं कुट्टमितं बिब्बोको ललितं तथा ॥ ४३ ॥
विहृतं च विविच्यन्ते तत्र स्वाभाविका दश ।

सत्त्वम्—

निर्विकारो मनोवृत्तिविशेषः सत्त्वमुच्यते ॥ ४४ ॥

भावः—

तस्याद्यविक्रिया भावो भाव्यऽलंकारकृद्यथा ।
भावो मानसशृङ्गारः,

[1] प्रातिवेशिनी A. [2] U. Omits this stanza. [3] सप्तालंकृतयो मताः P.

"दृष्टिं सा ललितां बिभर्ति न शिशुक्रीडासु बद्धादरा
श्रोत्रे प्रेरयति प्रवर्तितसखीसंभोगवार्तास्वपि ।
पुंसामङ्कमपेतशङ्कमधुना नारोहति प्राग्यथा
बाला यौवनशैशवव्यतिकरावष्टभ्यमाना शनैः ॥"

हावः—

हावोऽक्षिभ्रूविक्रियथा ॥ ४५ ॥

"अव्याजमुग्धमधुरैररविन्दकोण-
निर्यन्मधुव्रतनिकायनिभैः कटाक्षैः ।
भावावतारपिशुनैरपि भो वयस्य
बाला भवन्तमकरोदपदेशलक्ष्यम् ॥"

हेला—

स एव हेला सुव्यक्तः शृङ्गारद्योतको यथा ।

"मकरन्दपानमत्तां मधुकरमालामिवारुणश्यामाम् ।
अलसविलुतापाङ्गां[1] दृष्टिं प्रेषयति दूतिकामिव ते ॥"

शोभा—

रूपोपभोगतारुण्यैः शोभाङ्गालंकृतिर्यथा ॥ ४६ ॥

"तां प्राङ्मुखीं तत्र निवेश्य तन्वीं क्षणं व्यलम्बन्त पुरो निषण्णाः ।
भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने संनिहितेऽपि नार्यः ॥"

कान्तिः—

शोभैव रागनिबिडा कान्तिरित्युच्यते यथा ।

[1] अलसवलितामपाङ्गैः A. U.

"उन्मीलद्वदनेन्दुदीप्तिविसरैर्दूरे[1] समुत्सारितं
भग्नं पीनकुचस्थलस्य च रुचा हस्तप्रभागर्हितम्[2] ।
एतस्याः कलविङ्ककण्ठकदलीकल्पं मिलत्कौतुका-
[3]दप्राप्ताङ्गसुखं रुषेव सहसा केशेषु लग्नं तमः ॥"

दीप्तिः—

कान्तेरेव हि विस्तारो दीप्तिरित्युच्यते यथा ॥ ४७ ॥

"[4]वनतरुवरवीथीवर्त्मगाढं पुरस्ता-
त्ततनिजतनुकान्त्या तर्जयन्ती तमिस्रम् ।
दिनविरमजिगीषोर्दीपिकेवासमेषो-
श्चरति चकितपादन्याससंभावितोर्वी ॥"

माधुर्यम्—

अश्लाघ्यवस्तुनो योगे माधुर्यं रम्यता यथा ।

"सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि[5] मधुराणां मण्डनं नाकृतीनाम् ॥"

प्रागल्भ्यम्—

व्रीडोत्थसाध्वसत्यागः प्रागल्भ्यं गीयते यथा ॥ ४८ ॥

"तथा व्रीडाविधेयापि तथा मुग्धापि सुन्दरी ।
[6]कलाप्रागल्भ्यचातुर्यसभास्वाचार्यकं गता ॥"

[1] विसरैस्तूर्णं U.
[2] प्रभाभिर्हृतम् U.
[3] अप्राप्ताभिमुखं P.
[4] वनतरुवरवाटीवर्ति P.
[5] किमिह च P.
[6] कलाप्रयोग P. कलाप्रागल्भ्यचातुर्यं U.

औदार्यम् —

औदार्यं च प्रियोत्कर्षो बह्वायासेऽपि तद्यथा ।

"अलसारुणलोचनारविन्दां परिभोगोचितधूसरैकचेलाम् ।
शिथिलाकुलवेणिबन्धरम्यामबलामन्तिकशायिनीं दिदृक्षे[1] ॥

धैर्यम् —

अचापलहतं चित्तवृत्तं धैर्यं मतं यथा ॥ ४९ ॥

"ज्वलतु गगने रात्रावखण्डकलः शशी
दहतु मदनः किं वा मृत्योः परेण विधास्यति ।
मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया
कुलममलिनं न त्वेवायं जनो न च जीवितम् ॥"

लीला—

प्रियानुकरणं लीला मधुरैश्चेष्टितैर्यथा ।

"आसितानि हसितानि कृतानि प्रेक्षितानि गदितानि गतानि ।
प्रायशोऽनुकुरुते ललिताङ्गी नर्तकीव चतुरं दयितस्य ॥"

विलासः—

प्रिये दृष्टे विलासोऽङ्गक्रियाद्यतिशयो यथा ॥ ५० ॥

"अत्रान्तरे किमपि वाग्विभवातिवृत्ति-
वैचित्र्यमुल्लसितविभ्रममुत्पलाक्ष्याः ।
तद्भूरिसात्त्विकविकारमपास्तधैर्य-
माचार्यकं विजयि मान्मथमाविरासीत् ॥"

[1] ददर्श P.

विच्छित्तिः—

स्वल्पाप्यलंक्रिया काले[1] विच्छित्तिस्तोषकृद्यथा ।

" कर्णार्पितो लोध्रकषायरूक्षे गोरोचनाभङ्गनितान्तगौरे ।
तस्याः कपोले परभागलाभाद्बबन्ध चक्षूंषि यवप्ररोहः ॥ "

विभ्रमः—

विभ्रमस्त्वरया काले[2] भूषणव्यत्ययो यथा ॥ ५१ ॥

" श्रुत्वायातं बहिः कान्तमसमाप्तविभूषया ।
फालेऽञ्जनं दृशोर्लाक्षा कपोले तिलकं कृतम् ॥ "

किलिकिञ्चितम्—

किलिकिञ्चितमश्रुकृद्धर्षादेः संकरो यथा ।

" रतिक्रीडाद्यूते कथमपि समासाद्य समयं
मया लब्धे तस्याः क्वणितकलकण्ठार्धमधुरे ।
कृतभ्रूभङ्गासौ प्रकटितविलक्षार्धरुदितं
क्रुधोद्भ्रान्तं कान्तं पुनरपि विदध्यान्मयि मुखम् ॥ "

मोट्टायितम्—

चित्रादावपि तत्त्वेन बुद्धिर्मोट्टायितं यथा ॥ ५२ ॥

" चित्रवर्तिन्यपि नृपे तत्त्वावेशेन चेतसा ।
व्रीडार्धवलितं चक्रे मुखेन्दुमवशैव[3] सा ॥ "

मोट्टायितं प्रियं स्मृत्वा स्वाङ्गभङ्गादि वा यथा ।

[1] कार्ये P. कारे U. [2] कान्ते P. [3] अवशेव A.

" स्मरदवथुनिमित्तं गूढमुन्नेतुमस्याः
सुभग तव कथायां प्रस्तुतायां सखीभिः ।
[1]वदति विनतपृष्ठोदस्तपीनस्तनाग्रा
ततवलयितबाहूज्जृम्भितैः स्वाङ्गभङ्गैः ॥ "

कुट्टमितम् —

हृष्टान्तः परिम्भादौ[2] कुप्येत्कुट्टमितं यथा ॥ ५३ ॥

" परिरम्भपरं निजं निरुन्धे करयोः केवलमेव कर्म कान्तम् ।
पुलकैः पुनरुच्यते भवत्याः पुर एव स्फुटमायताक्षि भावः ॥ "

बिब्बोकः—

गर्वाभिमानावेशेन बिब्बोकोऽनादरो यथा ।

" सव्याजं तिलकालकानविरलं लोलाङ्गुलीभिः स्पृशन्
वारं वारमुदञ्चयन् कुचयुगप्रोतं च चीराञ्चलम्[3] ।
यद्भ्रूभङ्गतरङ्गिताञ्चितदृशा सावज्ञमालोकित-
स्तद्गर्वादवधीरितोऽस्मि न पुनः कान्तः कृतार्थीकृतः ॥ "

ललितम् —

सुकुमाराङ्गविन्यासो मसृणो ललितं यथा ॥ ५४ ॥

" सभ्रूभङ्गं करकिसलयावर्तनैरालपन्ती
सा पश्यन्ती ललितललितं लोचनस्याञ्चलेन ।
विन्यस्यन्ती चरणकमले लीलया स्वैरयातै-
र्निःसंगीतं प्रथमवयसा नर्तिता पङ्कजाक्षी ॥ "

[1] हरति P. [2] परिरम्भाद्यैः U. [3] चीनाञ्चलम् P. U.

विहृतम्—

वक्तव्यमपि यन्नोक्तं व्रीडया विहृतं यथा ।

"पादाङ्गुष्ठेन भूमिं किसलयमृदुना सापदेशं लिखन्ती
भूयो भूयः क्षिपन्ती मयि सितशबले लोचने लोलतारे ।
वक्त्रं ह्रीनम्रमीषत्स्फुरदधरपुटं वाक्यगर्भं दधाना
यन्मां नोवाच किंचित्स्थितमपि हृदये मानसं तद् दुनोति ॥"

इत्युदाहृतयो नेतृगुणेषूह्या यथोचितम् ॥ ५५ ॥
नेतारो बहवः सन्तु[1] धीरोदात्तो जगत्त्रये ।
[2]तोण्डनिर्यङ्ककारस्त्वमेको [3]मन्नमहीपते ॥ ५६ ॥

इति श्रीमदमृतानन्दयोगिप्रवरविरचितेऽलंकारसंग्रहे
नेतृभेदनिर्णयो नाम चतुर्थः परिच्छेदः

---

[1] सन्ति P. [2] तोण्डनिर्याङ्ककारी A. [3] मन्म P.

पञ्चमः परिच्छेदः

रीतिः—

रीतिरात्मात्र काव्यस्य कथ्यते सा चतुर्विधा ।

चतुर्विधा रीतयः—

वैदर्भी च तथा गौडी पाञ्चाली लाटिकेति च ॥ १ ॥

गुणाः—

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥ २ ॥

श्लेषः—

अल्पप्राणाक्षरैः[1] श्लेषः पदैरशिथिलैर्मतः ।

प्रसादः—

पदैः प्रसन्नैर्यत्रार्थः प्रसादोऽसौ प्रतीयते ॥ ३ ॥

समता—

प्रक्रान्तबन्धो यत्र स्यात्समः सा समता मता ।

माधुर्यम्—

बन्धा मृदुस्फुटोन्मिश्रवर्णविन्यासयोनयः ॥ ४ ॥
सरसौ यत्र शब्दार्थौ माधुर्यं श्रुतिमोदकृत् ।

[1] अक्षरः A.

सुकुमारता—

अनिष्ठुरैः श्रुतिसुखैर्वर्णैः स्यात्सुकुमारता ॥ ५ ॥

अर्थव्यक्तिः—

अर्थव्यक्तिरनेयोऽर्थः साक्षाद्यत्राभिधीयते ।

उदारता—

शब्दार्थयोर्गुणोत्कर्षो यत्र सा स्यादुदारता ॥ ६ ॥

ओजः—

वाक्ये समासबाहुल्यं हृद्यमोजोऽभिधीयते ।

कान्तिः—

कमनीयो लौकिकोऽपि यत्रार्थः कान्तिरुच्यते ॥ ७ ॥

समाधिः—

समाधिरन्यधर्माणामध्यासादर्थगौरवम् ।

वैदर्भी—

[1]एतैः समग्रा वैदर्भी वर्ण्यते दशभिर्गुणैः ॥ ८ ॥
असमस्ता द्वित्रपदसमस्ता वा मनोहरा ।
[2]वर्गद्वितीयप्रचुरा स्वल्पघोषाक्षरा यथा ॥ ९ ॥

"वैदेहि पश्यामलयाद्विभक्तं मत्सेतुना फेनिलमम्बुराशिम् ।
छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम्[3] ॥"

[1] एतैस्तु मिश्रा P.

[2] वर्ग्य A.

[3] तारतारम् P.

गौडी—

समस्तात्युद्भटपदामोजःकान्तिसमन्विताम् ।
महाप्राणाक्षरवतीं गौडीमाहुर्बुधा यथा ॥ १० ॥

"अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा-
जिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना ।
पूर्वं गाधिसुतेन सामि घटिता मुक्ता नु मन्दाकिनी
यत्प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि ॥"

पाञ्चाली—

माधुर्यसौकुमार्यौजःकान्तिभिः सहिता गुणैः ।
समस्तपञ्चषपदा पाञ्चाली कीर्त्यते यथा ॥ ११ ॥

"वैदर्भीकेलिशैले मरकतशिखरादुत्थितैरंशुदर्भै-
र्ब्रह्माण्डाघातभग्नस्यदजमदतया ह्रीधृतावाङ्मुखत्वैः ।
कस्या नोत्तानगाया दिवि सुरसुरभेरास्यदेशं गताग्रै-
र्यद्गोग्रासप्रदानव्रतसुकृतमविश्रान्तमुज्जृम्भते स्म ॥"

लाटी—

समस्तरीतिसंमिश्रा लाटी मृदुसमासिनी ।
संयुक्तवर्णभूयिष्ठा स्वल्पघोषाक्षरा यथा ॥ १२ ॥

"एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डुर-
प्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते ।
तत्पल्लीपतिपुत्रि कुञ्जरकुलं कुम्भाभयाभ्यर्थना-
दीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथाः ॥"

रसानां गुणविशेषाः—

शृङ्गारहास्यकरुणशान्ता माधुर्यशालिनः ।
वीररौद्राद्भुतभयबीभत्सेष्वोज उच्यते ॥ १३ ॥
रसेष्वेतेषु सर्वेषु प्रसादः परिकीर्तितः ।
अन्ये गुणा यथायोगं योजनीयाः पृथक्पृथक्[1] ॥ १४ ॥

अर्थालंकाराः—

अथार्थानामलंकाराः कथ्यन्ते सांप्रतं क्रमात् ।
स्वभावाख्यानमुपमा रूपकं दीपकावृती ॥ १५ ॥
आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना ।
समासातिशयोत्प्रेक्षे हेतुः सूक्ष्मो लवः क्रमः ॥ १६ ॥
प्रेयो रसवदूर्जस्वि पर्यायोक्तं समाहितम् ।
उदात्तापह्नुतिश्लिष्टविशेषास्तुल्ययोगिता ॥ १७ ॥
विरोधाप्रस्तुतस्तोत्रे व्याजस्तुतिनिदर्शने ।
सहोक्तिः परिवृत्त्याशीर्वक्रोक्तिरथ संकरः ॥ १८ ॥

स्वभावोक्तिः—

यद्यद्वस्तु यथावस्थं तथा तद्रूपवर्णनम् ।
स्वभावोक्तिरिति ख्याता सैव जातिर्मता यथा ॥ १९ ॥

"अङ्कोपान्तमुपाश्रितो गजमुखो मातुर्भुजालम्बितः
स्तन्यास्वादसुखातिरेकतरलस्तद्वक्त्रदत्तेक्षणः ।
हस्ताग्रेण पयोधरान्तरमुखं गृह्णन्मुहुर्लीलया
पादाब्जं मणिकिंकिणीपरिगतं प्रेङ्खोलयन्पातु नः[2] ॥"

[1] क्वचित्क्वचित् A. U.　　[2] वः P. U.

चतुर्विधा स्वभावोक्तिः—

जातिक्रियागुणद्रव्यभेदैः[1] सापि चतुर्विधा ।

उपमा—

यस्य येनास्ति सादृश्यं यस्मात्कस्मात्प्रकारतः ॥ २० ॥
उपमा नाम तस्योक्तिरिववद्वादिभिर्यथा ।

"उन्मुक्तकञ्चुकतयेयमुदारकान्तिः शस्त्रीव शम्बररिपोरपनीतकोशा ।
रक्तावगुण्ठनपटीरचितापिधाना संध्याम्बुवाहकलितेव शशाङ्करेखा ॥"

बहवस्तत्प्रकाराः स्युस्तेषामन्यत्र विस्तरः ॥ २१ ॥

रूपकम्—

एकत्र रूपणं यत्स्यादुपमानोपमेययोः ।
रूपकं नाम तच्चापि बहुभेदयुतं यथा ॥ २२ ॥

"मन्दस्मितं मधुरमम्बु मुखं सरोजं
मन्दारदाम महितं ननु बाहुयुग्मम् ।
पुण्याहपूर्णकलशौ पृथुलौ स्तनौ ते
नीराजना निजकटाक्षनिरीक्षणानि ॥"

दीपकम्—

सुबन्तं वा तिङन्तं वा पदमेकत्र संगतम् ।
सर्वोपकारकं स्याच्चेत्तदाहुर्दीपकं यथा ॥ २३ ॥

सुबन्तदीपकम्—

"अक्षं विक्षिपति ध्वजं विभजते मृद्नाति नद्धं युगं
चक्रे चूर्णयति क्षिणोति तुरगान् रक्षःपतेः पक्षिराट् ।

[1] भेदात् A. U.

रुन्धे गर्जति तर्जयत्यभिभवत्यालम्बते ताडय-
त्याकर्षत्यपकर्षति प्रचलति न्यञ्चत्युदञ्चत्यपि ॥"

तिङन्तदीपकम्—

"संचारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम् ।
प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः ॥"

आवृत्तिः—

उक्तस्यानेकधोक्तिः स्यादावृत्तिः सा मता[1] यथा ।

"विश्वं जित्वा भवानद्य विहरत्यवरोधनैः ।
विहरत्यप्सरोभिस्ते रिपुवर्गो दिवं गतः ॥"

आक्षेपः—

आक्षेपः प्रतिषेधोक्तिः कालधर्मादिकात्मनाम्[2] ॥ २४ ॥
आक्षेप्यानामनन्तत्वादाक्षेपोऽपि तथा यथा ।

"कस्तूरीतिलकं बाले फाले मा कुरु मा कुरु ।
अद्य साम्यं भजामीति जृम्भते शशलाञ्छनः ॥"

अर्थान्तरन्यासः—

प्रस्तुतार्थस्य सिद्ध्यर्थं विन्यासोऽर्थान्तरस्य यः ॥ २५ ॥
असावर्थान्तरन्यासो भिद्यते बहुधा यथा ।

"आतपे धृतिमता सह वध्वा यामिनीविरहिणा विहगेन ।
सेहिरे न किरणा हिमरश्मेर्दुःखिते मनसि सर्वमसह्यम् ॥"

[1] आवृत्तिः संमता U.
[2] कालधर्मदिगात्मनाम् A.

व्यतिरेकः—

शाब्दे प्रातीतिके वापि [1]सादृश्ये सति वस्तुनोः ॥ २६ ॥
तयोर्यद्भेदकथनं व्यतिरेको मतो यथा ।

"अभिन्नवेलौ गम्भीरावम्बुराशिर्भवानपि ।
असावञ्जनसंकाशस्त्वं तु चामीकरद्युतिः[2] ॥"

"हीना दानगुणेन हेमवलयैस्त्यक्ता गता विभ्रमै-
[3]र्भीता त्वत्परिभूतिसंशयवती मध्येजलं संश्रिता ।
किंचैतत्कुचकुम्भयुग्मविगलत्[4]क्षौमापिधानोज्झिता
बाले बालमृणालिका कथमियं त्वद्बाहुवल्लीसमा ॥"

विभावना—

स्वकारणनिराकृत्या कारणान्तरकल्पनम् ॥ २७ ॥
विभावना स्वभावो वा विभाव्यो यत्र सा यथा ।

"असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ वयः प्रपेदे ॥"

"अनञ्जितासिता दृष्टिर्भ्रूरनावर्जिता नता ।
अरञ्जितारुणच्छायमधरं तव सुन्दरि ॥"

समासोक्तिः—

वस्तु किंचिदभिप्रेत्य तत्तुल्यस्यान्यवस्तुनः ॥ २८ ॥
उक्तिः समासरूपत्वात्सा समासोक्तिरिष्यते ।
अन्यापदेश इत्यस्या नामान्यच्चोच्यते यथा ॥ २९ ॥

[1] सादृश्यं यत्र A. 1.
[2] प्रभः A. G. 1.
[3] भूयः G. 1.
[4] विलसत् P.

"मुग्धे यदाकलयसे मृगतृष्णिकाम्भ-
स्तद्विद्धि तामरसनेत्रि तटाकवारि ।
अस्मिन् यथेष्टमवगाह्य सुखं विहृत्य
[1]चिन्तामपाकुरु चिराय विमुञ्च तापम् ॥"

अतिशयोक्तिः—

विवक्षितार्थविषये लोकवृत्तातिशायिनी ।
उक्तिस्त्वतिशयोक्तिः स्यादनुद्वेगकरी यथा ॥ ३० ॥

"यदगारघटाट्टकुट्टिमस्रवदिन्दूपलतुन्दिलापगा ।
मुमुचे न पतिव्रतौचिती प्रतिचन्द्रोदयमभ्रगङ्गया ॥"

उत्प्रेक्षा—

यथार्थस्यान्यथा क्लृप्तिरुत्प्रेक्षा साभिधीयते ।
मन्येशङ्केध्रुवंप्रायोनूनमित्यादिभिर्यथा ॥ ३१ ॥

"यदेतस्मिन्निन्दौ जलदलवलीलां प्रकुरुते
तदाचष्टे लोकः शश इति न मां तु प्रति तथा ।
अहं त्विन्दुं मन्ये त्वदरिविरहाक्रान्ततरुणी-
कटाक्षोल्कापातव्रणकिणकलङ्काङ्कितततनुम् ॥"

उत्प्रेक्षाव्यञ्जकः—

इवशब्दः क्रियायोगे तूत्प्रेक्षाव्यञ्जको यथा ।

"अयोध्यापुरनारीणां मुखसौन्दर्यलिप्सया ।
सरोजानि सरोमध्ये चरन्तीव चिरं तपः ॥"

[1] चिन्तां पराकुरु विमुञ्च चिराय U.

हेतुः—

कारकं [1]व्यञ्जकं वापि हेतुर्यत्र विशेषणम् ॥ ३२ ॥
निर्वर्त्ये वा विकार्ये वा प्राप्ये वा कारकं यथा ।

"अयमान्दोलितप्रौढचन्दनद्रुमपल्लवः ।
उत्पादयति लोकस्य प्रीतिं दक्षिणमारुतः ॥"

"एष ते विद्रुमच्छायो मरुमार्ग इवाधरः ।
करोति कस्य नो मुग्धे पिपासाव्याकुलं मनः ॥"

"मानयोग्यां करोमीति प्रियस्थाने कृतां सखीम् ।
बाला भ्रूभङ्गजिह्माक्षी पश्यति स्फुरिताधरम् ॥"

"अवध्यैरिन्दुपादानामसाध्यैश्चन्दनाम्भसाम् ।
देहोष्मभिः सुबोधं ते सखि कामातुरं मनः ॥"

भावाभावादिभेदेन हेतुभेदास्त्वनेकशः ॥ ३३ ॥

सूक्ष्मः—

इङ्गिताकारलक्ष्यार्थसौक्ष्म्यात्सूक्ष्मो मतो यथा ।

"पथि पथिकवधूभिः सादरं पृच्छ्यमाना
कुवलयदलनीलः कोऽयमार्ये तवेति ।
स्मितविकसितगण्डं व्रीडविभ्रान्तनेत्रं
मुखमवनमयन्ती स्पष्टमाचष्ट सीता ॥"

लवः—

वचसा चेष्टयार्थस्य गोपनं वा प्रकाशनम् ॥ ३४ ॥
लेशमेके विदुर्निन्दां स्तुतिं वा लेशतो यथा ।

[1] ज्ञापकं A.

"निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥"

"दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
आसीद्विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥"

क्रमः—

उद्दिष्टानां पदार्थानां क्रमेणैवानुदेशिभिः ॥ ३५ ॥
सह संयोगकथनं क्रम इत्युच्यते यथा ।

"हिमशिशिरवसन्तग्रीष्मवर्षाशरत्सु
स्तनतपनवनाम्भोहर्म्यगोक्षीरपानैः ।
सुखमनुभव राजन् त्वद्विषो यान्तु नाशं
दिवसकमललज्जाशर्वरीरेणुपङ्कैः ॥"

प्रेयः—

प्रेयः प्रियतरालापः प्रेमादिख्यापकं यथा ॥ ३६ ॥

"[1]अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः ।
मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः ॥"

[1] The Poona MS. omits this stanza and gives the stanza मलयपवनमन्द etc. as the example.

रसवत्—

[1]रसानामेव सर्वेषामुत्कर्षो रसवद्यथा ।

" मलयपवनमन्दस्पन्दमानारविन्द-
प्रसरदलिविलासप्रौढिपाटच्चराणाम् ।
अधिगतिरहमेवालीकरोषस्पृशां स्या-
मलसवलदपाङ्गालोकितानाममुष्याः ॥ "

रसानामिह चान्येषामुत्कर्षस्तूद्धतां बुधैः ॥ ३७ ॥
अत्यहंकारवद्वाक्यमूर्जस्वीत्युच्यते यथा ।

ऊर्जस्वि—

" क्षुद्राः संत्रासमेनं विजहित हरयो भिन्नशक्रेभकुम्भा
युष्मद्गात्रेषु लज्जां दधति परममी सायकाः संपतन्तः ।
सौमित्रे तिष्ठ पात्रं त्वमपि न हि रुषो नन्वहं मेघनादः
किंचिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥ "

पर्यायोक्तम्—

इष्टमर्थमनाख्याय साक्षात्तस्यैव सिद्धये ॥ ३८ ॥
यत्प्रकारान्तराख्यानं पर्यायोक्तं मतं यथा ।

" त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
शोभामित्यभिधायिनि प्रियतमे [2]तद्वेणिकासंस्पृशि ।

[1] Poona MS. reads रसौघभूतो रसवद्यथा and gives the stanza
" अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥ "
as the example instead of मलयपवन etc.

[2] तद्वीटिका. P.

शय्योपान्तनिविष्टसस्मितवधूनेत्रोत्सवानन्दितो[1]
निर्यातः शनकैरलीकवचनोपान्यासमालीजनः ॥"

समाहितम् —

किंचिदारभमाणस्य कार्यं दैववशात्पुनः ॥ ३९ ॥
तत्साधनसमापत्तिः समाहितमिदं यथा ।

"मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् ॥"

उदात्तम् —

तदुदात्तं यन्महत्त्वमाशयैश्वर्ययोर्यथा ॥ ४० ॥

"गुरोः शासनमत्येतुं न शशाक स राघवः ।
यो रावणशिरश्छेदकार्यभारेऽप्यविक्लबः ॥"
"रत्नस्तम्भेषु संक्रान्तप्रतिबिम्बशतैर्वृतः ।
ज्ञातो लङ्केश्वरः कृच्छादाञ्जनेयेन तत्त्वतः ॥"

अपह्नुतिः—

सत्यार्थापह्नवादन्यप्रकारोऽपह्नुतिर्यथा ।

"नेयं निशा दिवस एव भवेत्कथं मे
निद्रान्यथा नयनयोर्युगलं न याति ।
नायं शशी तपन एव तनोति ताप-
मुत्पात एव यदि मास्तु विभान्ति ताराः ॥"

[1] सखी. P. U.

श्लिष्टम्—

एकरूपमनेकार्थं श्लिष्टं बहुविधं यथा ॥ ४१ ॥

"प्रौढपयोधरभारा प्रावृण्मलिनाम्बरा प्रबाष्पधरा ।
मानसगतराजहंसा मानवतीवाद्य भाति मदनार्ता ॥"

वशेषोक्तिः—

गुणजातिक्रियादीनां यत्र वैकल्यदर्शनम् ।
विशेषदर्शनायैव विशेषोक्तिर्मता यथा ॥ ४२ ॥

"धनुः पौष्पं मौर्वी मधुकरमयी चञ्चलदृशां
दृशां कोणो बाणः सुहृदपि जडात्मा हिमकरः ।
तथाप्येकोऽनङ्गस्त्रिभुवनमपि व्याकुलयति
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥"

तुल्ययोगिता—

यत्प्रसिद्धगुणैः साम्यकथनं यस्य कस्यचित् ।
स्तुत्या वा निन्दया तुल्ययोगिता सा मता यथा ॥ ४३ ॥

"यमः कुबेरो वरुणः सहस्राक्षो भवानपि ।
बिभ्रत्यनन्यविषयां लोकपाला इति श्रुतिम्[1] ॥"
"संगतानि मृगाक्षीणां तटिद्विलसितानि च ।
क्षणद्वयं न तिष्ठन्ति घनारब्धान्यपि स्वयम् ॥"

विरोधः—

उक्तैः पदार्थैर्यैः कश्चिद्विरुद्धोऽर्थः प्रसाध्यते ।
विरोध इति विज्ञेयः सोऽपि नानाविधो यथा ॥ ४४ ॥

[1] स्मृतिम् U.

"मृणालबाहु रम्भोरु पद्मोत्पलदलेक्षणम् ।
अपि ते रूपमस्माकं तन्वि तापाय कल्पते ॥"

अप्रस्तुतस्तुतिः—

अप्रस्तुतस्तुतिः सा स्यादप्रक्रान्तेऽपि या स्तुतिः ।
सेवादिक्लेशनिर्विण्णमानसेन कृता यथा ॥ ४५ ॥

"मन्दिरमरविन्दकुटी बिसमशनं शयनमम्बुजदलानि ।
कल्लोला हिन्दोला मरालयूनोस्तपांसि भूयांसि ॥"

व्याजस्तुतिः—

यदि निन्दन्निव स्तौति व्याजस्तुतिरसौ यथा ।

कीर्तिस्ते दयिता तदीयजठरे लोकत्रयं वर्तते
तस्मात्त्वं जगतां पिता पितृधनं तेनार्थिनां त्वद्धनम् ।
[1]त्यागं ते जगदेकमल्लनृपते त्यागं न मन्यामहे
कस्त्यागः स्वकुटुम्बपोषणविधावर्थव्ययं कुर्वतः ॥

निदर्शना—

अर्थान्तरमुपन्यस्य किंचित्तत्सदृशं यदा[2] ॥ ४६ ॥
सदसद्वा निदर्श्येत निदर्शनमिदं यथा ।

"अणुमपि परकीयं हन्त सन्तो नयन्ते
गुणमधिकगुरुत्वं तद्धि तेषां स्वभावः ।
सरसिजकुहरान्तःपत्रमात्रप्रभूतं
परिमलमपि वाताः किं न विस्तारयन्ति ॥"

[1] वीरश्रीरणरङ्गमल्लनृपते P.

[2] यदि P.

"दुर्जनः परिहर्तव्यः साधुभिः[1] सख्यवैरयोः ।
श्वा भवत्यपकाराय लिहन्नपि[2] दशन्नपि ॥"

सहोक्तिः—

सहोक्तिः सहभावस्य वस्तूनां कथनं यथा ॥ ४७ ॥

"[3]सह दीर्घा मम श्वासैरिमाः संप्रति रात्रयः ।
पाण्डुराश्च ममैवाङ्गैः सह ताश्चन्द्रभूषणाः ॥"

"कम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः ।
[4]तद्गजालानतां प्राप्तैरङ्कोलैः सार्धमानताः ॥"

परिवृत्तिः—

अर्थानां यो विनिमयः परिवृत्तिस्तु सा यथा ।

"क्रयविक्रयदक्षस्ते खड्गो भूपाल वैरिणाम् ।
हृत्वा भूमण्डलं दत्ते रम्भायाः कुचमण्डलम् ॥"

आशीः—

आशीर्नामाभिलषिते वस्तुन्याशंसनं यथा ॥ ४८ ॥

"सव्यार्धजानिः सनकादिवन्द्यः कनल्ललाटः कमलारिजूटः ।
मुदे सदैवास्तु मुमुक्षुमृग्यः श्रीकण्ठनामा[5] श्रितवत्सलो नः[6] ॥"

[1] धीमता P. G. 1.

[2] स्पृशन्नपि G. 1.

[3] दिगन्तमगमत्तस्य कीर्तिः प्रत्यर्थिभिः सह ।
दीर्घायते मम श्वासैरिमाः संप्रति रात्रयः ॥ G. 1.

[4] गजालानपरिक्लिष्टैः A 1.

[5] नाथः P.

[6] वः P. U.

वक्रोक्तिः—

कोपात्प्रियवदुक्तिर्या वक्रोक्तिः कथ्यते यथा ।

"साधु दूति पुनः साधु कर्तव्यं किमतः परम् ।
यन्मदर्थे विभिन्नासि[1] दन्तैरपि नखैरपि ॥"

संकरः—

नानालंकारसंयोगात्कथ्यते संकरो यथा[2] ॥ ४९ ॥

"आक्षिपन्त्यरविन्दानि मुग्धे तव मुखाम्बुजम् ।
कोशदण्डसमग्राणां किमेषामस्ति दुष्करम् ॥"

अलंकारप्रभेदानामनेकत्वात्पृथक्पृथक् ।
दिङ्मात्रमत्र कथितं संग्रहत्वान्न विस्तृतिः[3] ॥ ५० ॥

प्रमाणालंकाराः—

अथ प्रमाणालंकाराः कथ्यन्ते सांप्रतं क्रमात् ।
प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः ॥ ५१ ॥
अनुमानं च तच्चाथ सांख्याः शब्दं च ते अपि ।
न्यायैकदेशिनोऽप्येवमुपमानं च केचन ॥ ५२ ॥
अर्थापत्त्या सहैतानि चत्वार्याह प्रभाकरः ।
अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा ॥ ५३ ॥
संभवैतिह्ययुक्तानि तानि पौराणिका जगुः ।

[1] विलग्नासि A 1. विलूनासि U.

[2] संकरः कथ्यते यथा U.

[3] विस्मृतिः A. 1.

प्रत्यक्षम्—

इन्द्रियाणामर्थयोगे यज्ज्ञानमुपजायते ॥ ५४ ॥
तत्प्रत्यक्षं समाख्यातं मनसा चेन्द्रियाणि षट् ।
प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकम् ॥ ५५ ॥
नामादिभिर्विशिष्टार्थविषयं सविकल्पकम् ।
अविशिष्टार्थविषयं प्रत्यक्षं निर्विकल्पकम् ॥ ५६ ॥
इन्द्रियोत्पन्नविज्ञानं प्रत्यक्षालंकृतिर्यथा ।

"क्रान्तकान्तवदनप्रतिबिम्बे भग्नबालसहकारसुगन्धौ ।
स्वादुनि [1]प्रणदितालिनि शीते निर्ववार मधुनीन्द्रियवर्गः ॥"

निर्वृतिर्मनसो वृत्तिरिन्द्रियैरुपनीयते ॥ ५७ ॥

अनुमानम्—

हेतुना हेतुमज्ज्ञानमनुमानं तदुच्यते ।
दृष्टं सामान्यतो दृष्टमिति चास्य विधाद्वयम् ॥ ५८ ॥
पूर्वं प्रत्यक्षयोग्यार्थमन्यार्थमितरद्यथा ।

"चूर्णबभ्रु लुलितस्रगाकुलं[2] छिन्नमेखलमलक्तकाङ्कितम् ।
उत्थितस्य शयनं विलासिनस्तस्य विभ्रमरतान्यवेदयत् ॥"

"परिरम्भपरं निजं निरुन्धे करयोः केवलमेव कर्म कान्तम् ।
पुलकैः पुनरुच्यते भवत्याः पुर एव स्फुटमायताक्षि भावः ॥"

आगमः—

यथार्थदर्शिनः पुंसो यथादृष्टार्थवादिनः ॥ ५९ ॥

[1] प्रमुदिता P.

[2] श्रमाकुलं P.

उपदेशः परार्थो य आगमः स मतो यथा ।

"परापकारनिरतैर्दुर्जनैः सह संगतिः ।
वदामि तत्त्वं भवतो न विधेया कदाचन ॥"

उपमानम्—

सादृश्यात्सदृशज्ञानमुपमानमिहोच्यते ॥ ६० ॥
अनुभूतार्थमननुभूतार्थं द्विविधं यथा ।

"अपि तुरगसमीपादुत्पतन्तं मयूरं
न स रुचिरकलापं बाणलक्षीचकार ।
सपदि गतमनस्कश्छिन्नमाल्यानुकीर्णे
रतिविगलितबन्धे केशपाशे प्रियायाः ॥"

"तां रोहिणीं विजानीहि ज्योतिषामत्र मण्डले ।
समूहस्तारकाणां यः शकटाकारमाश्रितः ॥"

अर्थापत्तिः—

दृष्टः श्रुतोऽपि वा योऽर्थः स्वस्यैवानुपपत्तितः ॥ ६१ ॥
प्रसूतेऽर्थान्तरे बुद्धिं सार्थापत्तिर्मता यथा ।

"निर्णेतुं शक्यमस्तीति मध्यं तव नितम्बिनि ।
अन्यथा नोपपद्येत पयोधरभरस्थितिः ॥"

"रुचिधाम्नि भर्तरि भृशं विमलाः परलोकमभ्युपगते विविशुः ।
ज्वलनं त्विषः कथमिवेतरथा सुलभोऽन्यजन्मनि स एव पतिः ॥"

अभावः—

अर्थस्याविद्यमानत्वमभाव इति कथ्यते ॥ ६२ ॥

प्रागभावोऽथ प्रध्वंसश्चान्योन्याभाव एव च ।
अत्यन्ताभाव इत्येवं चतुर्धा भिद्यते यथा ॥ ६३ ॥

" अनभ्यासेन विद्यानामसंसर्गेण धीमताम् ।
अनिग्रहेण चाक्षाणां व्यसनं जायते नृणाम् ॥ "

" धृतिरस्तमिता [1]रतिश्च्युता विरतं गेयमृतुर्निरुत्सवः ।
गतमाभरणप्रयोजनं परिशून्यं शयनीयमद्य मे ॥ "

" कर्णोत्पलं न चक्षुस्ते न चक्षुः श्रवणोत्पलम् ।
इति जानन्नपि जनो मन्यते दीर्घनेत्रताम् ॥ "

" सव्यापसव्यत्यजनाद् द्विरुक्तैः पञ्चेषुबाणैः पृथगर्जितासु ।
दशासु शेषा खलु तद्दशा या तया नभःपुष्पतु कोरकेण ॥ "

संभवः—

आढकं संभवेद् द्रोणे सहस्रेऽपि शतं तथा ।
आहुरेवंविधं ज्ञानं संभवं मुनयो यथा ॥ ६४ ॥

" ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान्प्रति नैष यत्नः ।
उत्पत्स्यते मम तु कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥ "

ऐतिह्यम्—

[2]प्रवादपारंपर्याद्यदनिर्दिष्टप्रवक्तृकम् ।
ऐतिह्यमिति विज्ञेयं प्रमाणं पण्डितैर्यथा ॥ ६५ ॥

[1] मतिः U.   [2] प्रवादपारंपर्यं तु यदनिर्दिष्टवक्तृकम् U.

"यासि भीरु ननु तत्र निशीथे ध्वान्तरुद्धदशदिक्प्रविभागे ।
वर्त्मनीह वटभूरुहि यक्षस्तिष्ठतीति न जना विचरन्ति[1] ॥"

**नानाविधालंकृतिनन्द्यवर्णां कन्यामिवैनां कवितां वृणीष्व ।
अस्यां यशःसंततिवृद्धिरस्तु विवेकविद्याधर मन्नभूप[2] ॥ ६६ ॥**

इति श्रीमदमृतानन्दयोगिप्रवरविरचितेऽलंकारसंग्रहे[3]
अलंकारनिर्णयो नाम पञ्चमः परिच्छेदः ।

---

[1] निविशन्ते U. [2] मन्मभूप P. [3] सर्वालंकारसंग्रहे U.

षष्ठः परिच्छेदः

पददोषाः—

अथ दोषाः प्रकीर्त्यन्ते पदानां प्रथमं क्रमात् ।
श्रुतिकट्वसमर्थं च च्युतसंस्कृत्यवाचकम् ॥ १ ॥
निरर्थकं चाप्रयुक्तमश्लीलं ग्राम्यमेव च ।
नेयार्थानुचितार्थे च संदिग्धं क्लिष्टमेव च ॥ २ ॥
अविमृष्टविधेयांशं विरुद्धमतिकृद्यथा ।
अप्रतीतमथैतेषां क्रमाल्लक्षणमुच्यते ॥ ३ ॥

श्रुतिकटु—

परुषाक्षरविन्यासं श्रुतिकट्विष्यते यथा ।

"अनङ्गमङ्गलगृहापाङ्गभङ्गीतरङ्गितैः ।
आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते सदा[1] ॥"

अत्र कार्तार्थ्यमिति यत्पदं श्रुतिकटूच्यते ॥ ४ ॥

असमर्थम्—

असमर्थमभिप्रेतं यद्वक्तुं न क्षमं यथा ।

"तीर्थान्तरेषु स्नानेन समुपार्जितसत्कृतिः ।
सुरस्रोतस्विनीमेष हन्ति संप्रति सादरम् ॥"

[1] कदा A.

[1]हन्तिस्तु हिंसागत्यर्थोऽप्यसमर्थो गताविह ॥ ५ ॥

च्युतसंस्कृति—

शास्त्रोक्तलक्षणापेतं च्युतसंस्कृति तद्यथा ।

"एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डुर-
प्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते ।
तत्पल्लीपतिपुत्रि कुञ्जरकुलं कुम्भाभयाभ्यर्थना-
दीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथाः ॥"

न [2]याच्ञार्थे नाथते स्यादाशिष्येवात्मनेपदम् ॥ ६ ॥

अवाचकम्—

अवाचकं न यत्रार्थे प्रयुक्तं वक्ति तद्यथा ।

"अवन्ध्यकोपस्य निहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः[3] ॥"

जीवसाधारणं जन्तुपदं नो दातृवाचकम् ॥ ७ ॥

निरर्थकम्—

निरर्थकं भवेत्पादपूरणैकफलं यथा ।

"बिभर्ति [4]यश्च देहार्धे प्रियामिन्दुं हि मूर्धनि ।
स वै देवः खलु त्वां तु पुनातु मदनान्तकः ॥"

[5]चतुहीत्यादिशब्दानामत्र स्वार्थो न विद्यते ॥ ८ ॥

[1] हन्तीति A 2. [2] याच्यर्थे A; G. 1. [3] न च द्विषादरः P.
[4] यः स्वदेहार्धे P. [5] तुवैहीत्यादि P.

अप्रयुक्तम्—

आम्नातमप्यप्रयुक्तं कविभिर्नादृतं यथा ।

"यथायं दारुणाचारः[1] सर्वथैव[2] विभाव्यते ।
तथा मन्ये दैवतोऽसौ पिशाचो राक्षसोऽथवा ॥"

पुंसि दैवतशब्दोऽयं कविभिर्न प्रयुज्यते ॥ ९ ॥

अश्लीलम्—

येनासभ्यः पदेनार्थो द्योत्यतेऽश्लीलमीरितम् ।

त्रिविधमश्लीलम्—

जुगुप्सामङ्गलव्रीडाद्योतकत्वात्[3] त्रिधा मता ॥ १० ॥

जुगुप्साश्लीलम्—

"लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः
कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः ।
मुग्धा कुड्मलिताननेन दधती वायुं स्थिता तस्य सा
भ्रान्त्या धूर्ततया पदानतिमृते तेनाभवच्चुम्बिता ॥"

अत्राननेन दधती वायुं सेति जुगुप्सितम् ।

अमङ्गलाश्लीलम्—

"मृदुपवनविभिन्नो मत्प्रियाया विनाशाद्
घनरुचिरकलापो निःसपत्नोऽद्य जातः ।
रतिविगलितबन्धे केशपाशे सुकेश्याः
सति कुसुमसनाथे किं करोत्वेष बर्ही ॥"

[1] कार; A 2. [2] सर्वदैव P. [3] व्यञ्जकत्वात् A; P.

मत्प्रियाया विनाशादित्येतत्पदममङ्गलम् ॥ ११ ॥

व्रीडाश्लीलम्—

"साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते ।
तस्य धीशालिनः कोऽन्यः सहेतारान्नतां[1] भ्रुवम् ॥"

अत्र साधनशब्दोऽयं व्रीडोत्पत्तिकरो मतः ।

ग्राम्यम्—

ग्रामीणयोग्यं यद् ग्राम्यं निन्द्यं नागरिकैर्यथा ॥ १२ ॥

"राकाविभावरीकान्तसंक्रान्तद्युति ते मुखम् ।
तपनीयशिलाशोभा कटिश्च हरते मनः ॥"

कटिशब्दोऽत्र [2]गुह्याङ्गवाचकत्वेन गर्ह्यते ।

नेयार्थम्—

नेयार्थं यदसामर्थ्यमूलार्थद्योतकं यथा ॥ १३ ॥

"शरत्कालसमुल्लासिपूर्णिमाशर्वरीप्रियम् ।
करोति ते मुखं तन्वि चपेटापातनातिथिम् ॥"

चपेटशब्दः सामर्थ्यान्नाभिधत्ते जयं त्विह ।

अनुचितार्थम्—

तदेवानुचितार्थं स्याद्यस्यार्थोऽनुचितो यथा ॥ १४ ॥

"तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या ।
प्रयान्ति तामाशु गतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः ॥"

[1] सहेतारालितां P. [2] गोप्याङ्ग P.

[1]व्यनक्त्युक्तं पशुपदं शूरे कातरतामिह ।

संदिग्धम्—

विवक्षितार्थादन्यच्च संदिग्धं द्योतयेद्यथा ॥ १५ ॥

"आलिङ्गितस्तत्रभवान् [2]सांपरायजयश्रिया ।
आशीःपरंपरां वन्द्यां कर्णे कृत्वा कृपां कुरु ॥"

अत्र वन्द्यामिति पदं बन्दीकृतनमस्ययोः ।

क्लिष्टम्—

क्लिष्टं व्यवहितार्थस्य द्योतकं स्यात्पदं यथा ॥ १६ ॥

"अत्रिलोचनसंभूतज्योतिरुद्गमभासिभिः ।
सदृशं शोभतेऽत्यर्थं भूपाल तव चेष्टितम् ॥"

अत्रिलोचनसंभूतश्चन्द्रस्तज्ज्योतिरुद्गमात् ।
भासीनि कुमुदानीति क्लिष्टत्वं व्यवधानतः ॥ १७ ॥

अविमृष्टविधेयांशम्—

अविमृष्टविधेयांशं प्राधान्याद्येन तद्यथा ।

"स्रस्तां नितम्बादवलम्बमाना [3]पुनः पुनः केसरदामकाञ्चीम् ।
न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौर्वीमिव कार्मुकस्य ॥"

प्राधान्यान्नेह निर्दिष्टो विधेयांशो द्वितीयता ॥ १८ ॥

विरुद्धमतिकृत्—

इष्टान्यदुष्टधीकारि विरुद्धमतिकृद्यथा ।

[1] व्यनक्त्यर्थं U. [2] सांपराये जयश्रिया A. [3] मुहुर्मुहुः A;

" सुधाकरकराकारविशारदविचेष्टितम् ।
अकार्यमित्रमेकोऽसौ तस्य किं वर्णयामहे ॥"

प्रयोजनं विना मित्रमित्यत्रार्थे विवक्षिते ॥ १९ ॥
अकार्ये मित्रमित्यन्यो विरुद्धोऽर्थः प्रतीयते ।

अप्रतीतार्थम्—

[1]शास्त्रमात्रप्रतीतार्थमप्रतीतं मतं यथा ॥ २० ॥

" सम्यग्ज्ञानमहाज्योत्स्नादलिताशयताजुषः[2] ।
विधीयमानमप्येतन्न भवेत्कर्म बन्धनम् ॥"

अत्राशयपदं वासनार्थमागमसिद्धिमत् ।

पदैकदेशदोषाः—

दोषान् पदैकदेशेषु यथायोगं[3] वदाम्यहम् ॥ २१ ॥

श्रुतिकटु—

" अलमतिचपलत्वात्स्वप्नमायोपमत्वा-
त्परिणतिविरसत्वात्संगमेनाङ्गनायाः ।
वयमिति शतकृत्वस्तत्त्वमालोचयाम-
स्तदपि न हरिणाक्षी विस्मरत्यन्तरात्मा ॥"

त्वप्रत्ययस्य बाहुल्यादिह श्रुतिकटूच्यते ।

अवाचकम्—

" किमुच्यतेऽस्य भूपालमौलिमालामहामणेः ।
सुदुर्लभं वचोबाणैस्तेजो यस्य विभाव्यते ॥"

[1] शास्त्रमात्रप्रसिद्धार्थं P. [2] कलिता A. [3] यथायोग्यं A.

वचःशब्देन गीःशब्दो लक्ष्यतेऽत्रेत्यवाचकम् ॥ २२ ॥

निरर्थकम्—

“ आदावञ्जनपुञ्जलिप्तवपुषां श्वासानिलोल्लासित-
प्रोत्सर्पद्विरहानलेन च ततः संतापितानां दृशाम् ।
संप्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो
भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा ॥ ”

निरर्थकं बहुत्वं स्याद् दृशामित्येकयोषितः ।
[1]फलस्याकर्तृगामित्वात्कुत्रश्चाप्यात्मनेपदम् ॥ २३ ॥

जुगुप्साश्लीलम्—

“ यः पूयते सुरसरिन्मुखतीर्थसार्थ-
स्नानेन शास्त्रपरिशीलनकीलकेन[2] ।
सौजन्यमान्यजनिरूर्जितमूर्जितानां
सोऽयं दृशोः पतति कस्यचिदेव पुंसः ॥ ”

पूयेत्यत्र जुगुप्सार्थमश्लीलमवगम्यते ।

अमङ्गलाश्लीलम्—

“ अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥ ”

प्रेतेत्यमङ्गलाश्लीलमत्र श्लोकेऽवगम्यते ॥ २४ ॥

[1] फलस्य कर्त्रगामित्वात् A 2.

[2] कीलनेन P; A.

संदिग्धम्—

" कस्मिन् कर्मणि सामर्थ्यमस्य नोत्तपतेतराम् ।
अयं साधुचरस्तस्मादञ्जलिर्बध्यतामिह ॥ "

भूतपूर्वे चरड्वात्र साधुचारीति संशयः ।

वाक्यदोषाः—

प्रतिकूलवर्णमुपहतलुप्तविसर्गं विसंधि हतवृत्तम् ॥ २५ ॥
न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तम् ।
अर्धान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यम् ॥ २६ ॥
अपदस्थपदसमासं संकीर्णं गर्भितं प्रसिद्धिहतम् ।
भग्नप्रक्रममक्रमममतपरार्थं[1] रसच्युतं च तथा ॥ २७ ॥
अप्रस्तुतार्थमित्यपि भवन्ति वाक्येष्वमी मता[2] दोषाः ।

प्रतिकूलवर्णम्—

प्रतिकूलवर्णमेतद्रसानुकूलाक्षरं न यद्धि यथा ॥ २८ ॥

" अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि माम् ।
कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर ॥ "

शृङ्गारे ठादीनां कठिनानां नानुकूल्यमस्तीह ।

उपहतलुप्तविसर्गम्—

उत्वौत्वे यत्र कृते लुप्तो वा स्याद्विसर्जनीयश्च ॥ २९ ॥
उपहतलुप्तविसर्गं दुष्टं तद्वाक्यमामनन्ति यथा ।

[1] पदार्थं U.

[2] A 2 omits मताः

"धीरो विनीतो निपुणो वराकारो नृपोऽत्र सः ।
यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः ॥"

उपहततामाद्यार्थे याति विसर्गः परे च लुप्तत्वम् ॥ ३० ॥

विसंधिभेदाः—

वैरूप्यं विश्लेषोऽश्लीलत्वं कष्टता च संधेः स्युः ।
दोषास्ते तद्वाक्यं विसंधि विबुधाः क्रमाद्वदन्ति यथा ॥ ३१ ॥

वैरूप्यविसंधि—

"राजन् विभान्ति भवतश्चरितानि तानि
इन्दोर्द्युतिं दधति यानि रसातलेऽन्तः ।
[1]ते धीबले अतितरे उचितार्थवृत्ती
आतन्वती विजयसंपदमेत्य भातः ॥"

सकृदविहितेऽत्र दोषो विहितेऽप्यसकृच्च भवति वैरूप्यम् ।

विश्लेषविसंधि—

"तत उदित उदारहारचारुद्युतिरुच्चैरुदयाचलादिवेन्दुः ।
निजवंश [2]उपात्तकान्तकान्तिर्धृतमुक्तामणिवच्चकास्त्यनर्घः ॥"

अत्र विहितेऽपि दोषो विश्लेषस्त्वसकृदेव विज्ञेयः ॥ ३२ ॥

अश्लीलविसंधि—

"विद्यामभ्यस्यतो रात्रावेति या भवतः प्रिया ।
वनिता गुह्यकेशानां क्रमते पेलवं वनम् ॥"

[1] धीदोर्बले P. तेजोबले A 2.　　　[2] उदात्त A 2.

संधावश्लीलत्वं दोषोऽत्र विवेकशालिभिर्ज्ञेयः ।

कष्टविसंधि—

"उर्व्यसावत्र [1]तर्वाली मर्वन्ते चार्ववस्थितिः ।
नात्रर्जु युज्यते गन्तुं शिरो नमय तन्मनाक् ॥"

इह कष्टत्वं संधेः क्लिष्टतया कथ्यतेऽसकृद्दोषः ॥ ३३ ॥

हतवृत्तभेदाः—

अयथात्वं गुरुलघ्वोर्वर्णानां यत्र हीनताधिक्ये ।
भग्नच्छन्दो वाक्यं हतवृत्तं चेति तद्वदन्ति यथा ॥ ३४ ॥

गुरुलघ्वोरयथात्वम्—

"कामेन पञ्चापि बाणा विमुक्ता मृगेक्षणास्वित्ययथागुरुत्वम् ।
मदनबाणा निशिताः पतन्ति वामेक्षणास्वित्ययथालघुत्वम् ॥"

हीनवर्णम्—

इन्दुपादाः शिशिराः स्पृशन्तीत्यूनवर्णता ।

अधिकवर्णम्—

सहकारस्य किसलयान्यार्द्राणीत्यधिकाक्षरम् ॥ ३५ ॥

भग्नच्छन्दः—

पादान्ते मध्ये वा यतिर्विरामोऽस्य भग्नताऽत्र यथा ।

"आदित्यस्य महति वंशे जातो नृपतिरेष घनकीर्तिः ।
भूरिदयालंकारः प्रभूतगुणवत्सलो जयत्यवनौ ॥"

[1] सर्वर्तौ तर्वाली P.

न्यूनपदम्—

येन विना यद्वाक्यं न्यूनं तन्न्यूनपदमुशन्ति यथा ॥ ३६ ॥

"तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥"

अस्माभिरिति विशेष्याभावादिह वाक्यमभिहितं न्यूनम् ।

अधिकपदम्—

यदभावादपि पूर्णं वाक्यं तेनाधिकपदमत्र यथा ॥ ३७ ॥

"स्फटिकाकृतिनिर्मलः प्रकामं प्रतिसंक्रान्तनिशातशास्त्रतत्त्वः ।
अविरुद्धसमन्वितोक्तियुक्तः प्रतिमल्लास्तमयोदयः स कोऽपि ॥"

आकृतिपदेन वाक्यं विनापि संपूर्णमेव भवतीह ।

कथितपदम्—

कथितपदं तद्यस्मिन् पदस्य कथितस्य कथनमेव यथा ॥ ३८

"अधिकरतलतल्पं कल्पितस्वापलीला
परिमिलननिमीलत्पाण्डिमा गण्डपालिः ।
सुतनु कथय कस्य व्यञ्जयत्यञ्जसैव
स्मरनरपतिलीलायौवराज्याभिषेकम् ॥"

लीलेति पूर्वकथितं पुनरपि लीलेति कथितमेतस्मिन् ।

पतत्प्रकर्षम्—

यस्मिन्नधः प्रकृष्टं पतत्प्रकर्षं तदामनन्ति यथा ॥ ३९ ॥

"कः कः कुत्र न घुर्घुरायितघुरीघोरो[1] घुरेत्सूकरः
कः कः कं कमलाकरं विकमलं कर्तुं करी नोद्यतः ।
के के कानि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः
सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो वर्तते ॥"

अत्र करिणः प्रकृष्टान्महिषाणामुपरि कीर्तनं क्रियते[2] ।

समाप्तपुनरात्तम्—

पुनरपि समाप्य कथितं समाप्तपुनरात्तमिति वदन्ति यथा ॥४०॥

"क्रेंकारः स्मरकार्मुकस्य सुरतक्रीडापिकीनां[3] रवो
झंकारो रतिमञ्जरीमधुलिहां लीलाचकोरीध्वनिः ।
तन्व्याः कञ्चुलिकापसारणभुजाक्षेपस्खलत्कङ्कण-
क्वाणः प्रेम तनोतु वो नववयोलास्याय वेणुस्वनः ॥"

अत्र समाप्तोऽप्यर्थः पुनरप्यादीयतेऽन्त्यपदान्ते ।

अर्थान्तरैकवाचकम्—

अर्थान्तरैकवाचकमपरार्धगतैकवाचकं तु यथा ॥ ४१ ॥

"मसृणचरणपातं गम्यतां भूः सदर्भा
विरचय सिचयान्तं मूर्ध्नि घर्मः कठोरः ।
तदिति जनकपुत्री लोचनैरश्रुपूर्णैः
पथि पथिकवधूभिः शिक्षिता वीक्षिता च ॥"

इह तच्छब्दो हेतुः सिचयान्तं मूर्ध्नि विरचयेत्यत्र ।

[1] घुरी=सूकरतुण्डम्. [2] कुरुते U. [3] पिकानां P.

अभवन्मतयोगम् —

अभवन्मतयोगं तद्यत्र समासे पदं गुणीभूतम् ॥ ४२ ॥
नान्यैः प्रधानभूतैर्लभते योगं प्रयोजनाय यथा ।

" चत्वारो वयमृत्विजः स भगवान् कर्मोपदेष्टा हरिः
संग्रामाध्वरदीक्षितो नरपतिः पत्नी गृहीतव्रता ।
कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलं
राजन्योपनिमन्त्रणाय रसति स्फीतं यशोदुन्दुभिः ॥ "

संग्रामाध्वरशब्दः समासगो दोषभावमेत्यत्र ॥ ४३ ॥

अनभिहितवाच्यम् —

अनभिहितवाच्यमेतद्यत्र न वक्तव्यमभ्यधायि यथा ।

" त्वयि निसर्गरतेः प्रियवादिनः प्रणयभङ्गपराङ्मुखचेतसः ।
कमपराधलवं मयि पश्यसि त्यजसि मानिनि दासजनं यतः ॥ "

अत्रावश्यं वाच्यं पश्यस्यपराधलवमपीति पदम् ॥ ४४ ॥

अपदस्थपदम् —

अस्थानस्थपदं तद्यत्रास्थाने स्थितं पदं हि यथा ।

" लग्नः केलिकचग्रहश्लथजटालम्बेन निद्रान्तरे
मुद्राङ्कः शितिकंधरेन्दुशकलेनान्तःकपोलच्छदम् ।
पार्वत्या नखलक्ष्मशङ्कितसखीनर्मस्मितह्रीतया
प्रोन्मृष्टः करपल्लवेन कुटिलाताम्रच्छविः पातु वः[1] ॥ "

कुटिलाताम्रच्छविरिति नखलक्ष्मेत्यादितः पुरा वाच्यम् ॥४५

[1] न; A 1.

अपदस्थसमासम् —

अस्थानस्थसमासं यत्रास्थाने समासशालि यथा ।

“ अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि
स्थातुं वाञ्छति मान एष धिगिति क्रोधादिवालोहितः ।
प्रोद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणा-
त्फुल्लत्कैरवकोशनिःसरदलिश्रेणीकृपाणं शशी ॥ ”

क्रुद्धोक्तावत्र कृतो न समासः किंतु कविवचस्येव ॥ ४६ ॥

संकीर्णम् —

संकीर्णं यत्रेतरवाक्यपदानीतरत्र सन्ति यथा ।

“ किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणेमम्[1] ।
ननु मुञ्च हृदयनाथं कण्ठे मनसस्तमोरूपम् ॥ ”

अधिकस्फुटमितरेतरवाक्यपदानां मिथः प्रवेशोऽत्र ॥ ४७ ॥
क्लिष्टत्वमेकवाक्ये वाक्यबहुत्वे तु भवति संकीर्णम् ।

गर्भितम् —

गर्भितमितरद्वाक्यं [2]वाक्यस्यैकस्य यत्र मध्येऽस्ति ॥ ४८ ॥

“ परापकारनिरतैर्दुर्जनैः सह संगतिः ।
वदामि भवतस्तत्त्वं न विधेया कदाचन ॥ ”

वाक्यमिदमितरवाक्यस्थितमिह भवतो वदामि तत्त्वमिति ।

[1] गृहाणैनम् P.

[2] वाक्यैकस्य A 2.

प्रसिद्धिहतम्—

यत्र प्रसिद्धिहीनं प्रसिद्धिहतमुच्यते पदं तु यथा ॥ ४९ ॥

“ महाप्रलयमारुतक्षुभितपुष्करावर्तक-
प्रचण्डघनगर्जितप्रतिरुतानुकारी मुहुः ।
रवः श्रवणभैरवः स्थगितरोदसीकंदरः
कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः ॥ ”

रुतमिति[1] शब्दविशेषे न शब्दमात्रे प्रसिद्धिभाग्भवति ।

भग्नप्रक्रमम्—

भग्नप्रक्रममुक्तं यत्र प्रक्रान्तरूपभङ्गः स्यात् ॥ ५० ॥

तस्य वैविध्यम्—

तदनेकधा विभिन्नं प्रकृतिप्रत्ययमुखैः क्रमेण यथा ।

प्रकृतिभग्नप्रक्रमम्—

“ नाथे निशाया नियतेर्नियोगादस्तं गते हन्त निशापि याता ।
कुलाङ्गनानां हि दशानुरूपं नातः परं भद्रतरं समस्ति ॥ ”

गत इति तु प्रक्रान्ते यातेति प्रकृतिरत्र भङ्गवती ॥ ५१ ॥

प्रत्ययभग्नप्रक्रमम्—

“ यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्तितुं वा ।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥ ”

**अत्र सुखलिप्सयेति प्रत्ययभङ्गो विविच्य विज्ञेयः ।
अन्येऽप्यत्र ज्ञेयाः प्रत्ययभङ्गा न तु प्रपञ्च्यन्ते ॥ ५२ ॥**

[1] रुतमिह A 1; P.

अक्रमम्—

यत्र विहतः क्रमः स्यादक्रममिति वाक्यमामनन्ति यथा ।

"निर्माणस्थितिसंहारहेतवो जगतां मताः ।
विष्णुत्रिलोचनाम्भोजयोनयः पालयन्तु वः[1] ॥"

परमेष्ठिहरिहरा इति वाच्ये भग्नः क्रमो भवत्यत्र ॥ ५३ ॥

अमतपरार्थम्—

अमतपरार्थं यत्र प्रकृतविरुद्धार्थकथनमेव यथा ।

"राममन्मथशरेण ताडिता[2] दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं[3] जगाम सा ॥"

प्रकृतरसेऽत्र विरुद्धं शृङ्गाररसस्य वर्णनं विहितम् ॥ ५४ ॥

रसच्युतम्—

यत्र रसोऽस्ति न वाक्ये रसच्युतं तदिति कीर्तयन्ति यथा ।

"एकपुच्छश्चतुष्पादः ककुद्मालँम्बकम्बलः ।
गोरपत्यं बलीवर्दो घासमत्ति मुखेन सः ॥"

जातिरपि नीरसत्वान्नालंकारोऽस्य किं तु दोषत्वम् ॥ ५५ ॥

अप्रस्तुतार्थम्—

अप्रस्तुतार्थमेतद्यत्राप्रस्तुतनुतिं करोति यथा ।

"तमालश्यामलं क्षारमत्यच्छमतिफेनिलम् ।
पादेन लङ्घयामास हनूमानेष सागरम् ॥"

[1] नः P. [2] पीडिता A 2. [3] निलयं G 3.

नात्र श्यामलतादेः कथनं तत्रोपयोगि स्यात्[1] ॥ ५६ ॥

अर्थदोषाः—

अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमग्राम्याः ।
संदिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च ॥ ५७ ॥
व्यर्थीकृतः सनियमानियमविशेषाविशेषपरिवृत्ताः[2] ।
साकाङ्क्षोक्तविरुद्धौ त्यक्तपुनःस्वीकृतोऽश्लीलः ॥ ५८ ॥
विध्यनुवादविवृत्तः सहचरभिन्नोऽर्थदोषाः स्युः ।

अपुष्टः—

विशेषणानामुक्तानां फलं यत्र न विद्यते ॥ ५९ ॥
विशेष्यपोषकत्वेन सोऽपुष्टार्थो मतो यथा ।

"अतिविततगगनसरणिप्रसरणपरिमुक्तविश्रमानन्दः ।
मरुदुल्लासितसौरभकमलाकरहासकृद्रविर्जयति ॥"

विमुक्तौ विश्रमानन्दौ पुष्यतो न रवेर्जयम् ॥ ६० ॥

कष्टः—

कष्टः कृच्छ्रेण विज्ञेयः शब्दसंक्षेपतो यथा ।

"कलशे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः ।
स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रममातनोति यत् ॥"

अत्यन्तव्यवधानेन ज्ञायतेऽर्थोऽत्र नो जवात्[3] ॥ ६१ ॥

[1] तल्लङ्घनोपयोगि स्यात् P.

[2] विशेषसामान्यपरिवृत्ताः U ; G 3.

[3] हठात् A 2 ; G 3.

व्याहतः—

अनादृतस्यैवोत्कर्षो वाक्ये स्याद्व्याहतो यथा ।

"जगति जयिनस्ते ते भावा नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये ।
मम तु यदियं याता लोके विलोचनचन्द्रिका
नयनविषयं जन्मन्येकः स एव महोत्सवः ॥"

अनादृत्येन्दुरेखाद्यं श्लाघ्यते चन्द्रिका त्विह ॥ ६२ ॥

पुनरुक्तः—

[1]एक एव द्विरुक्तोऽर्थः पुनरुक्तो मतो यथा ।

"अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे
सेनानाथे स्थितेऽस्मिन् मम पितरि गुरौ सर्वधन्वीश्वराणाम् ।
कर्णालं संभ्रमेण व्रज कृप समरं मुञ्च हार्दिक्य शङ्कां
ताते चापद्वितीये वहति [2]रणधुरां को भयस्यावकाशः ॥"

पौनरुक्त्यमिहार्थस्य प्रसिद्धं समपादयोः ॥ ६३ ॥

दुष्क्रमः—

वक्तव्ययोरर्थयोर्यो व्युत्क्रमो दुष्क्रमो यथा ।

"भूपालरत्न निर्दैन्य प्रसन्न प्रथितोत्सव ।
विश्राणय तुरङ्गं मे मातङ्गं वा मदालसम् ॥"

मातङ्गस्यात्र निर्देशो न्याय्यः प्रागेव बुध्यताम् ॥ ६४ ॥

[1] योऽर्थो यत्र द्विरुक्तः स्यात् P. [2] रणधुरं P.

ग्राम्यः—

निर्लज्जैः कथितो योऽर्थो ग्राम्योऽसावुच्यते यथा ।

" सपङ्कतलविन्यस्तसारङ्गखुरसंनिभम् ।
अरोमशं मृगाक्षीणां वन्दे मदनमन्दिरम् ॥ "

इह ग्राम्यत्वमर्थस्य प्रसिद्धमवगम्यते ॥ ६५ ॥

संदिग्धः—

द्वेधा प्रतीयमानोऽर्थः संदिग्धोऽनिर्णयाद्यथा ।

" मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमिदं वदन्तु ।
सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम् ॥ "

विरक्तो वात्र रक्तो वा वक्ता चेन्निर्णयो भवेत् ॥ ६६ ॥

निर्हेतुः—

निर्हेतुको विना हेतुं कार्यं यत्रोच्यते यथा ।

" गृहीतं येनासीः परपरिभवभयान्नोचितमपि
प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः ।
परित्यक्तं तेन त्वमपि सुतशोकान्न तु भया-
द्विमोक्ष्ये शस्त्र त्वामहमपि यतः स्वस्ति भवते ॥ "

विमोक्ष्येऽहमपीत्यत्र न हेतुः शस्त्रमोचने ॥ ६७ ॥

प्रसिद्धिविरुद्धः—

स प्रसिद्धिविरुद्धो यो लोकैरविदितो यथा ।

"इदं ते केनोक्तं कथय कमलातङ्कवदने
यदेतस्मिन् हेम्नः कटकमिति धत्से खलु धियम्[1] ।
इदं तद्दुःसाधं कलय परमास्त्रं स्मृतिभुवा
तव प्रीत्या चक्रं करकमलमूले विनिहितम् ॥"

चक्रं मनोभवस्यास्त्रमप्रसिद्धमिहोच्यते ॥ ६८ ॥

विद्याविरुद्धः—

विद्याविरुद्धः स्मृत्यादिविरोधात्कथितो यथा ।

"सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः ।
नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च ॥"

उपरागं विना रात्रौ स्नानं तु स्मृतिगर्हितम् ॥ ६९ ॥

व्यर्थीकृतः—

व्यर्थीकृतो यच्छ्लाघ्यानां व्यर्थत्वापादनं यथा ।

"प्राप्ताः श्रियः सकलकामदुघास्ततः किं
न्यस्तं पदं शिरसि विद्विषतां ततः किम् ।
संतर्पिताः प्रणयिनो विभवैस्ततः किं
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ॥"

नाधिकारिवधं क्वापि त्याज्यमावश्यकं न च[2] ॥ ४५ ॥
एकाहचरितैकार्थं कुर्याच्चासन्ननायकम् ।
पात्रैस्त्रिचतुरैरङ्कं तेषामन्तेऽस्य निर्गमः ॥ ४६ ॥
एवमङ्काः प्रकर्तव्याः प्रवेशादिपुरस्कृताः ।

नाटके अङ्कसंख्या—

पञ्चाङ्कं च षडङ्कं च सप्ताङ्कं च तथापरम् ॥ ४७ ॥
अष्टाङ्कं च नवाङ्कं च दशाङ्कं नाटकं विदुः ।
मारीचवञ्चनं नाम पञ्चाङ्कं परिकीर्तितम् ॥ ४८ ॥
वेणीसंहारसंज्ञं तु षडङ्कं नाटकं मतम् ।
शाकुन्तलं तु सप्ताङ्कमष्टाङ्कं नलवीजयः[3] ॥ ४९ ॥
देवीपरिणयाख्यानं नवाङ्कं परिकीर्तितम् ।
बालरामायणं नाम दशाङ्कं नाटकं मतम् ॥ ५० ॥

प्रकरणम्—

प्रकरणे इतिवृत्तम्—

अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम् ।

प्रकरणे नायकः—

अमात्यविप्रवणिजामेकं कुर्याच्च नायकम् ॥ ५१ ॥

[1] निर्दिशेत्, S. [2] क्वचित्, U; G 3. [3] 'उपसर्गस्य घञ्यमनुष्ये' इति दीर्घः

धीरप्रशान्तं सापायं[1] धर्मकामार्थतत्परम् ।

प्रकरणे नायिका—

नायिकां तद्विधां नेतुः कुर्यात् स्त्रीं गणिकां तथा ॥ ५२ ॥
क्वचिदेकैव कुलजा वेश्या क्वापि द्वयं क्वचित् ।

प्रकरणस्य त्रैविध्यम्—

आभिः प्रकरणं त्रेधा शुद्धं स्यात्कुलजान्वितम् ॥ ५३ ॥
संकीर्णं वेश्यया युक्तं मिश्रं तद्द्वयसंकरात्[2] ।

प्रकरणे संध्यादि—

शेषं नाटकवत् [3]संधिप्रवेशकरसादिकम् ॥ ५४ ॥

भाणः—

भाणस्तु धूर्तचरितं स्वानुभूतं परेण वा ।

भाणे नायकः—

यत्रोपवर्णयेदेको निपुणः पण्डितो विटः ॥ ५५ ॥
संबोधनोक्तिप्रत्युक्ती कुर्यादाकाशभाषितैः ।

भाणे रसः—

सूचयेद्वीरशृङ्गारौ शौर्यसौभाग्यसंस्तवैः ॥ ५६ ॥

भाणे वृत्त्यङ्कवस्तूनि—

भूयसा भारती वृत्तिरेकाङ्कं वस्तु कल्पितम् ।

[1] सोपायं, S; A 2. [2] संगतम्, G 3; U; S. [3] सर्वं S.

भाणे संधयः—

मुखनिर्वहणे साङ्गे लास्याङ्गानि दशापि च ॥ ५७ ॥

लास्याङ्गानि—

गेयपदं स्थितपाठ्यमासीनं पुष्पगन्धिका ।
प्रच्छेदकस्त्रिमूढं च सैन्धवाख्यं द्विमूढकम् ॥ ५८ ॥
उत्तमोत्तमकं चान्यदुक्तप्रत्युक्तमेव च ।
लास्ये दशविधं ह्येतदङ्गनिर्देशकल्पनम् ॥ ५९ ॥

गेयपदम्—

सुखासीनाः श्रुतिसुखं यत्र गायन्ति गायकाः ।
तताद्विवाद्यमिश्रं तच्छुष्कं गेयपदं यथा ॥ ६० ॥

" सुखासीनाः सन्तः सुरभिकुसुमामोदसुभगे
तले सान्द्रच्छाये तरुणसहकारस्य शिशिरे ।
कलैर्वीणावाद्यैः[1] सममृदुलसंदिग्धवचसो
रसावेशोल्लासान्मधुरमिह[2] गायन्ति मदनम्[3] ॥ "

स्थितपाठ्यम्—

पठेद्यत्रासनासीना प्राकृतं विरहातुरा ।
अङ्गनानङ्गतप्ताङ्गी स्थितपाठ्यं मतं यथा ॥ ६१ ॥

" रत्तिए हित्थहिअओ महुअर मोत्तूण पदुमिणीमण्णत्तो ।
गच्छसि गच्छ पुणो सा पेच्छदि णाण्णं णिमीलिदंबुरुहच्छी ॥
(रात्र्या त्रस्तहृदयो मधुकर मुक्त्वा पद्मिनीमन्यत्र ।
गच्छसि गच्छ पुनः सा पश्यति नान्यं निमीलिताम्बुरुहाक्षी ॥) "

[1] क्वाणैः, U ; G 3. [2] मदनमिह, U ; G 3. [3] मधुरम् U ; G 3.

आसीनम्—

' शोकचिन्तापरवशं वाद्याभिनयवर्जितम् ।
आस्यते यत्र कामिन्या तदासीनं मतं यथा ॥ ६२ ॥

" बाले मालतिके,

म्लानं ते वदनं [1]मदो विगलितो मन्दो विलासक्रम-
श्चिन्ताशोकवशं चिरोज्झितसुखं चित्तं वपुर्धूसरम् ।
निःशब्दाभिनयं निविश्य[2] विजने त्वं चेष्टसे नो यथा
प्रालेयप्रकरेण पीडितपरिक्लिष्टाम्बुजा पद्मिनी ॥"

पुष्पगन्धिका—

नर्तक्याः पुरुषस्येव प्रगल्भं चेष्टितं यदा ।
नैकभेदं च संगीतं सा ज्ञेया पुष्पगन्धिका ॥ ६३ ॥

" ग्रीवाविभूषणविषक्तदुकूलकोणसंछन्नपीवरपयोधरभारनम्रा ।
मैरेयमत्तमहिलाकरदत्ततालमातन्वती समदनर्तनमाविरास्ते ॥

सखि शारदिके, पुंवत्प्रगल्भा विविधगानमुखरविलासिनीमण्डली-मध्यगता निस्त्रपं नृत्यसि ।"

प्रच्छेदकः—

स हि प्रच्छेदको यत्र ज्योत्स्नासंपातविक्लबाः ।
कामिन्यो यान्त्यपव्रीडाः सागसोऽपि प्रियान्यथा ॥ ६४ ॥

" [3]प्रशिथिलनिजलज्जाः प्राङ्मुखं वीक्षमाणा-
[4]स्तिमिरविरतिभीतास्तूर्णमुत्तीर्णमार्गाः ।

[1] मनो विगलितम्, S; A 2. [2] निवेश्य, S. [3] प्रचलित S; A 2.
[4] तिमिरविगमभीतास्तीर्णमार्गाश्च तूर्णम् S.

वलयचलनलोला वञ्चितात्मीयलोकाः
सततमभिसरेयुः सागसोऽप्यात्मनाथान्[1] ॥"

त्रिमूढम्—

पुंभावप्रचुरं नाट्यं समवृत्तपरिष्कृतम् ।
मृदुश्लक्ष्णपदं यत्र तत् त्रिमूढं स्मृतं यथा ॥ ६५ ॥

"अस्याः खलु,

अभिनयशस्तौ हस्तौ पादौ परिभूतकिसलयौ सलयौ ।
अङ्गं [2]चित्तजरङ्गं नृत्तं पुंभावशालि समवृत्तम् ॥"

सैन्धवम्—

न नाट्ये लक्ष्यते पाठ्यं[3] पात्रं संकेतवर्जितम् ।
जायते सैन्धवी भाषा यत्र तत्सैन्धवं यथा ॥ ६६ ॥

"नाट्यमलक्षितपाठ्यं[4] पात्रं संकेतवर्जितं यत्र ।
सैन्धवभाषाचतुरैर्विहितं वैदेशिकैर्नटैर्वीथ्याम् ॥"

द्विमूढम्—

रसभावाः परिक्लिष्टाश्चतुरश्रः परिश्रमः ।
मुखप्रतिमुखे चित्रे तद् द्विमूढं मतं यथा ॥ ६७ ॥

"[5]अत एव खल्वस्याः—

रसभावाः परिक्लिष्टाः प्रौढो विद्यापरिश्रमः ।
चित्रे मुखप्रतिमुखे सलयः पादयोः क्रमः ॥"

[1] पि स्वनाथान्, S. [2] रञ्जितरङ्गं, U; G 3; S. [3] वाद्यं, U; G 3.
[4] वाद्यं, U; G 3. [5] तत एव U; G 3.

उत्तमोत्तमकम्—

विचित्रश्लोकसंदर्भो यत्र नानाविधो रसः ।
हेला भावश्च ललितश्चोत्तमोत्तमकं यथा ॥ ६८ ॥

"[1]केयमपटीक्षेपेण प्रविशति ?

अङ्कूरत्कुचमप्यनल्पविलसत्तत्संनिवेशक्रमं
वक्षोऽस्या वलिरेखिकाभिरुदरं वामभ्रुवो वास्यते ।
अङ्गं रङ्गदशामनङ्गनृपतेः कारागृहं श्रीयते
भावैश्चित्रपदार्थभावितरसान् श्लोकान् पठत्याननम् ॥"

उक्तप्रत्युक्तम्—

पदानि साधिक्षेपाणि चित्रं गीतार्थयोजनम् ।
यत्र कोपप्रसादाभ्यामुक्तप्रत्युक्तकं यथा ॥ ६९ ॥

"अपि च तस्याः पश्चान्निषण्णा काचित् कुपिता,
गायति गेयं साधिक्षेपपदं सहचरीमुखे स्खलिते ।
तस्यामियं प्रसन्ना चित्रं गीतार्थमभिनयत्यङ्गैः[2] ॥"

अथ प्रहसनं त्रेधा शुद्धवैकृतसंकरैः ।
पाषण्डविप्रप्रभृतिचेटीचेटविटाकुलम् ॥ ७० ॥
चेष्टितं वेषभाषादिशुद्धं हास्यवचोऽन्वितम् ।
कामुकादिवचोवेषैः षण्डकञ्चुकितापसैः ॥ ७१ ॥
विकृतं संकराद्वीथ्या संकीर्णं धूर्तसंकुलम् ।

[1] पटाक्षेपेण U; G 3; A 2. [2] नयत्युच्चैः U; G 3.

रौद्रबीभत्सरहिता रसाः स्युर्हास्य एव वा ॥ ७२ ॥
भाणवत्संधिलास्याङ्गान्येकाङ्कं द्व्यङ्कमेव वा ।

डिमः—

डिमे वस्तु प्रसिद्धं स्याद् वृत्तयः कैशिकीं विना ॥ ७३ ॥
नेतारो देवगन्धर्वयक्षरक्षोमहोरगाः ।
भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः ॥ ७४ ॥
रसैरहास्यशृङ्गारशान्तैः षड्भिः समन्वितः ।
मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ॥ ७५ ॥
चन्द्रसूर्योपरागैश्च न्याय्ये रौद्ररसेऽङ्गिनि ।
चतुरङ्कश्चतुःसंधिर्निर्विमर्शो डिमः स्मृतः ॥ ७६ ॥
इदं त्रिपुरदाहे तु लक्षणं ब्रह्मणोदितम् ।
ततस्त्रिपुरदाहश्च डिमसंज्ञः प्रयोजितः ॥ ७७ ॥

व्यायोगः—

ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः ।
हीनो गर्भविमर्शाभ्यां दीप्ताः स्युर्डिमवद्रसाः ॥ ७८ ॥
अस्त्रीनिमित्तसंग्रामो जामदग्न्यजयो यथा ।
एकाहचरितैकाङ्को व्यायोगो बहुभिर्नरैः ॥ ७९ ॥

समवकारः—

कार्यं समवकारेऽपि चामुखं नाटकादिवत् ।
ख्यातं दैवासुरं वस्तु निर्विमर्शास्तु संधयः ॥ ८० ॥
वृत्तयो हीनकैशिक्यो नेतारो देवदानवाः ।
द्वादशोद्धतविख्याताः फलं तेषां पृथक्पृथक् ॥ ८१ ॥

अङ्गी वीरोऽङ्गानि चान्ये यद्वदम्भोधिमन्थने ।
अङ्कैस्त्रिभिस्त्रिकपटस्त्रिशृङ्गारस्त्रिविद्रवः ॥ ८२ ॥
द्विसंधिरङ्कः प्रथमः कार्यो द्वादशनाडिकः ।
चतुर्द्विनाडिकावन्त्यौ नाडिका घटिकाद्वयम् ॥ ८३ ॥
वस्तुस्वभावदैवारिकृताः स्युः कपटास्त्रयः ।
धर्मार्थकामैः शृङ्गारा नात्र बिन्दुप्रवेशकौ ॥ ८४ ॥
व्रताद्युज्ज्वलता शौचं धर्मशृङ्गार उच्यते ।
मुक्तारत्नाद्यलंकारैरर्थशृङ्गार एव हि ॥ ८५ ॥
संभोगविप्रलम्भादिः कामशृङ्गार इत्ययम् ।
पुरावरोधयुद्धेभवाताग्न्यादिषु विद्रवाः ॥ ८६ ॥
वीथ्यङ्गानि[1] यथालाभं कुर्यात्प्रहसनं यथा ।

वीथी—

वीथी तु कैशिकीवृत्तौ संध्यङ्गांशश्च भाणवत् ॥ ८७ ॥
रसः सूच्यस्तु शृङ्गारः स्पृशेदपि रसान्तरम् ।
नायिकानायकौ कार्यौ शृङ्गारद्वयसंश्रयौ ॥ ८८ ॥

वीथ्यङ्गानि—

युक्ता प्रस्तावनाख्यातैरङ्गैरुद्घात्यकादिभिः ।
उद्घात्यकावलगिते प्रपञ्चत्रिगते छलम् ॥ ८९ ॥
वाक्केल्यधिबले गण्डमवस्यन्दितनालिके ।
असत्प्रलापव्याहारमृदवानि त्रयोदश ॥ ९० ॥

[1] वीथ्यङ्गादि U; G. 3.

उद्घात्यकम्—

गूढार्थपदपर्यायमाला प्रश्नोत्तरस्य वा ।
यत्रान्योन्यसमालापो द्वेधोद्घात्यं मतं यथा ॥ ९१ ॥

"मानवती—अय्ये कादंबिणि, आअदो तुह कालो ।
(आर्ये कादम्बिनि, आगतस्तव कालः ।)

कादम्बिनी—वत्से मानवति, अत एव खल्वहं विहरामि । किंतु अकालेऽप्ययं राजहंसः प्रविष्ट इति विचारयामि ।

राजा—(समन्तादवलोक्य अनाकलितविहङ्गविहारः स्वगतम्)
वचनमिदमात्मविषयं वर्णितमनयावधार्यते युक्त्या ।
प्रमदानामनुरागः प्रायः प्राप्तेरपि प्रियं तनुते ॥

मानवती—अय्ये, राअहंसो कहिं दिट्ठो ?
(आर्ये, राजहंसः कुत्र दृष्टः ?)

कादम्बिनी—वत्से, तव मानसे ।

मानवती—अय्ये, मत्तासि ।
(आर्ये, मत्तासि ।)"

"का श्लाघा गुणिनां क्षमा परिभवः को यः स्वकीयैः कृतः
किं दुःखं परसंश्रयो जगति कः श्लाघ्यो य आश्रीयते ।
को मृत्युर्व्यसनं शुचं जहति के यैर्निर्जिताः शत्रवः
कैर्विज्ञातमिदं विराटनगरे छन्नस्थितैः पाण्डवैः ॥"

अवलगितम्—

यत्रैकत्र समावेशात्कार्यमन्यत्प्रसाध्यते ।
प्रस्तुतेऽन्यत्र वा तत्स्याद् द्विधावलगितं यथा ॥ ९२ ॥

"रामः—लक्ष्मण, तातवियुक्तामयोध्यां विमानस्थो नाहं प्रवेष्टुं शक्नोमि । तदवतीर्य गच्छामि ।

(इत्यवतीर्य कतिचित्पदानि गत्वा निरूप्य)

[1]कोऽयं सिंहासनस्याधः स्थितः पादुकयोः पुरः ।
जटावानक्षवलयी [2]चामरी च विराजते ॥"

"विदूषकः—(अपवार्य) वअस्स, मह कंठे [3]कासेण कंडूदि होदि । किं कादव्वं ?

(वयस्य, मम कण्ठे काशेन कण्डूतिर्भवति । किं कर्तव्यम् ?)

राजा—(सानुनयम्) वयस्य, सकर्पूरं ताम्बूलं चर । तावता कण्ठ-[4]कण्डूतिर्निवर्तते । ताम्बूल चेदम् ।"

प्रपञ्चः—

असद्भूतं मिथः स्तोत्रं प्रपञ्चो हास्यकृद्यथा ।

"राजा—वयस्य, त्वया वयमतिसंहिताः ।

विदूषकः—वअस्स, तुए एव्व सिक्खिदणेवुणो तुह एव्व कहं अदिसंदाणं कप्पेमि । किंदु,

घडेमि अण्णेण परस्स जाअं मुणीण मोएमि वदं मुहुत्ते ।
मणस्सिणीणं विहडेमि माणं तुह प्पहावेण तणोमि सव्वं[5] ॥"

(वयस्य, त्वयैव शिक्षितनैपुणस्तवैव कथमतिसंधानं कल्पयामि । किंतु,

[1] कोऽपि A. [2] चारुरेव U; G 3. S. [3] कोणेण U; G 3.
[4] कण्डूः U; G 3. [5] णूणं S.

घटयाम्यन्येन परस्य जायां मुनीनां मोचयामि व्रतं मुहूर्ते ।
मनस्विनीनां विघटयामि मानं तव प्रभावेण तनोमि सर्वम् ॥) ”

त्रिगतम्—

श्रुतिसाम्यादनेकार्थयोजनं त्रिगतं त्विह ॥ ९३ ॥
नटादित्रितयालापः पूर्वरङ्गे मतं यथा ।

“ नटी—अय्य, तह होदु ।
(आर्य, तथा भवतु)
सूत्रधारः—(आकाशमवलोक्य)
विलोलविद्युल्लतिकावरत्रा विनिःसरद्वारिमदप्रवाहाः ।
घनद्विपा गर्जितबृंहिताढ्याश्चरन्ति खे चातकचञ्चरीकाः ॥ ”

छलनम्—

प्रियाभैरप्रियैर्वाक्यैर्विलोभश्छलनं यथा ॥ ९४ ॥

“ राजा—(सोत्प्रासम्)
समसुखदुःखः संप्रति सखा ममान्योऽस्ति कस्त्वया सदृशः ।
यदमुष्मिन्नपि यतसे कार्ये साहाय्यमेवमाचरितुम् ॥ ”

वाकेली—

विनिवृत्त्यास्य वाकेली द्वित्रिः प्रत्युक्तितो यथा ।

“ मानवती—अय्ये कादंबिणि,
अणिसं पि मअरकेदू अयमणिवारिदवेरहदुस्साहो ।
तं पि दहेत्ति मं विअ दाहो एक्केण तेण दुव्वज्जो ॥
(आर्ये, कादम्बिनि,
अनिशमपि मकरकेतुरयमनिवारितवैरहृदुत्साहः ।
तमपि दहेत्किं मामिव दाह एकेन तेन दुर्वार्यः ॥)

कादम्बिनी—

मन्मथो ननु मात्सर्यात्तद्रूपविजितस्तव ।
तापं तनोति नामुष्य नान्यथा कथमागतः ॥

मानवती—अय्ये, सो एव्व सव्वत्त दीसइ । कहं णाअदो ?
(आर्ये, स एव सर्वत्र दृश्यते । कथं नागतः ?) "

अधिबलम्—

अन्योन्यवाक्यैरत्युक्तिः स्पर्धयाधिबलं यथा ॥ ९५ ॥

" भीमः—

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते
तृणमिव परिभूतो यस्य गर्वेण लोकः । "

इत्युपक्रमे,

" अरे नाहं भवानिव विकत्थनाप्रगल्भः । किंतु,

द्रक्ष्यन्ति न चिरात्सुप्तं बान्धवास्त्वां रणाङ्गणे ।
मद्गदाभिन्नवक्षोऽस्थिवेणिकाभङ्गभीषणम् ॥ "

गण्डम्—

गण्डं प्रस्तुतधिक्कारि भिन्नं वेगोदितं यथा ।

" कादम्बिनी—वत्से, समागतः ।

मानवती—(सानन्दम्) अय्ये, कोऽसौ ?
(आर्ये, कोऽसौ ?)

कादम्बिनी—तवानुजः ।

मानवती—(सविषादम्) "

गण्डभेदाः—

अमुमेवान्यथा गण्डं प्राहुः पञ्चविधं परे ॥ ९६ ॥
आकस्मिकमसंबद्धं संबद्धमिव यत्पदम् ।
वाचामन्ते स गण्डः स्याद्भाव्यनिष्टार्थसूचकम् ॥ ९७ ॥
प्रतिहारो रहो हर्षः प्रतिभा व्याहृतोऽपि च ।

प्रतिहारः—

प्रतिक्रियान्वितो यस्तु प्रतिहारो मतो यथा ॥ ९८ ॥

" को मां हन्तुं समर्थः स्यादित्युक्तो रावणेन तु ।
राक्षसो राम इत्याह किं राम इति चोदितः ॥
पुनराह यदा रामः कदाचिदुपयास्यति ।
दूरीकृत्य परं मोहादशिवां वाचमाहरत् ॥ "

रहः—

आत्मानं निर्दिशेद्यस्तु स रहोगण्ड उच्यते ।

" यथा दुर्योधनो भीमं हन्तीत्याशयवान् भ्रमात् ।
प्राह दुर्योधनं भीमो हन्तीति कुरुनायकः ॥ "

हर्षः—

उत्सवोच्छूकरोमाञ्चः प्रविश्यामोदकृद्वचः ॥ ९९ ॥
भाषते भावि यत्रासौ हर्षगण्डः स्मृतो यथा ।

" केनाप्यर्थेन कंसस्येत्युक्तवत्येव यादवे ।
नृत्यन्नानर्तकोऽप्याह दारको जातवानिति ॥ "

प्रतिभा—

उक्तमन्यार्थमन्येन वचोऽन्यार्थं प्रकल्पयेत् ॥ १०० ॥
सामान्यपदसामर्थ्यात्स गण्डः प्रतिभा मता ।

"यो जातोऽन्यत्र योऽन्यत्र वर्धितो मधुसंभवः[1] ।
परपुष्टः स संक्रुद्धो मारयत्यनिवारितः ।
इत्युत्कण्ठितया प्रोक्तं कंसेनाहितमन्यथा ॥"

व्याहृतः—

द्व्यर्थो वाक्यस्य विन्यासो शुभाशुभसमन्वितः ॥ १०१ ॥
प्रत्यक्षं प्रोच्यते यत्र गण्डः स व्याहृतो मतः ।

"यथा देवमुनिस्तत्र दानवं कंसमब्रवीत् ।
सभृत्यबलवीर्यस्य प्राप्तोऽस्मि भवतः क्षयम् ॥"

अवस्यन्दितम्—

प्रसक्तस्यान्यथा व्याख्या यत्रावस्यन्दितं यथा ॥ १०२ ॥

"सीता—जाद, कल्लं खु तुम्हेहिं अजुज्झाए गंतव्वं । तहिं सो राआ विणएण णमिदव्वो ।

(जात, कल्यं खलु युवाभ्यामयोध्यायां गन्तव्यम् । तत्र स राजा विनयेन नन्तव्यः ।)

लवः—किमावाभ्यां राजोपजीविभ्यां भवितव्यम् ?

सीता—जाद, सो खु तुम्हाणं पिदा ।

(जात, स खलु युवयोः पिता ।)

[1] यदुपुत्रस्य मधोर्वंशे जातः

लवः—किमावयो रघुपतिः पिता ?

सीता—(साशङ्कम्) ण हु तुम्हाणं, सअलाए एव्व पुहवीए ।

(न खलु युवयोः, सकलाया एव पृथिव्याः ।) ”

नालिका—

बहुप्रपञ्चसंयुक्ता हास्यलेशसमन्विता ।
प्रहेलिकेव गूढार्था नालिकेत्युच्यते यथा ॥ १०३ ॥

“ राजा—(पुरतो निर्वर्ण्य)

वल्लरी किमुत वामलोचना दूरतो वसति दृष्टिवर्तिनी ।
वायुना चलति किनु नर्तिता मन्मुखी मदनवेदनासहा ॥

विदूषकः—वअस्स, मए विणिच्चिदम् ।

(वयस्य, मया विनिश्चितम् ।) ”

असत्प्रलापः—

असंबद्धकथाप्रायोऽसत्प्रलापो यथोत्तरः ।
विरहोन्मत्तबालादिभाषणेषु मतो यथा ॥ १०४ ॥

“ हंस प्रयच्छ मे कान्तां गतिस्तस्यास्त्वया हृता ।
विभावितैकदेशेन स्तेयं यदभियुज्यते ॥ ”

“ भुक्ता हि महागिरयः स्नातोऽहं वह्निना पिबामि नभः ।
हरिहरहिरण्यगर्भा मम पुत्रास्तेन नृत्यामि ॥ ”

“ अर्चिष्मन्ति विदार्य वक्त्रकुहराण्या सृक्कणो वासुके-
स्तर्जन्या विषकर्बुरान् गणयतः संस्पृश्य दन्ताङ्कुरान् ।
एकं पञ्च नवाष्ट सप्त षडिति व्यत्यस्तसंख्याक्रमा
वाचः शक्तिधरस्य शैशवकलाः श्रेयांसि पुष्णन्तु वः ॥ ”

व्याहारः—

अन्यार्थ एव व्याहारो हास्यलेशकरो यथा ।

" (लास्यप्रयोगावसाने मालविका निर्गन्तुमिच्छति)

विदूषकः—मा दाव । उवदेससुद्धा णिग्गमिस्ससि ।

(मा तावत् । उपदेशशुद्धा निर्गमिष्यसि ।) "

इत्युपक्रमेण,

" गणदासः—(विदूषकं प्रति) आर्य, उच्यतां यस्त्वया क्रमभेदो लक्षितः ।

विदूषकः—पढमप्पयोगे बम्हणस्स पूआ होदि । सा ताए ण किदा ।

(प्रथमप्रयोगे ब्राह्मणस्य पूजा भवति । सा तया न कृता ।)

(मालविका स्मयते) "

मृदवम्—

दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं यथा ॥ १०५ ॥

" कष्टं खलु विप्रकुले जननं कष्टं च भार्यया विरहः ।

धन्याः शूद्रा एषां दारपरिग्रहणमल्पमूल्येन ॥ "

एवं दिशि विधातव्या द्वित्रिपात्रप्रयोजिता ।

अङ्कः—

[1]उत्सृष्टिकाङ्के प्रख्यातं वृत्तं बुद्ध्या प्रयोजयेत् ॥ १०६ ॥

रसस्तु करुणः स्थायी नेतारः प्राकृता नराः ।

भाणवत्संधिवृत्त्यङ्गैर्युक्तः स्त्रीपरिदेवितैः ॥ १०७ ॥

वाचा युद्धं विधातव्यं तथा जयपराजयौ ।

[1] अङ्कस्यैवोत्सृष्टिकाङ्क इति नामान्तरम् ।

ईहामृगः—

मिश्रमीहामृगे वस्तु चतुरङ्कस्त्रिसंधिमान् ॥ १०८ ॥
नरदिव्यावनियमान्नायकप्रतिनायकौ ।
ख्यातौ धीरोद्धतावन्त्यो विपर्यासादयुक्तकृत् ॥ १०९ ॥
दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः ।
शृङ्गाराभासमप्यत्र किंचित्किंचित्प्रदर्शयेत् ॥ ११० ॥
संरम्भं परमानीय युद्धं व्याजान्निवारयेत् ।
वधं प्राप्तस्य कुर्वीत परं नैव महात्मनः ॥ १११ ॥
कैशिकीवृत्तिरहितो हास्यशृङ्गारवर्जितः ।
अत्र षण्णायकानन्ये वदन्तीहामृगे नरान् ॥ ११२ ॥

नाटिका—

लक्ष्यते नाटिकाप्यत्र मिश्रवस्तुसमाश्रया ।
तत्र वस्तु प्रकरणान्नाटकान्नायको नृपः ॥ ११३ ॥
प्रख्यातो धीरललितः शृङ्गारोऽङ्गी सलक्षणः ।
देवी तत्र भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा ॥ ११४ ॥
गम्भीरा मानिनी कृच्छ्रात्तद्वशान्नेतृसंगमः ।
प्राप्या तु तादृशी मुग्धा दिव्या वातिमनोहरा ॥ ११५ ॥
अन्तःपुरातिसंबन्धादासन्ना श्रुतिदर्शनैः ।
अनुरागो नवावस्थो नेतुस्तस्यां यथोत्तरम् ॥ ११६ ॥
नेता तत्र प्रवर्तेत देवीत्रासेन वञ्चितः ।
कैशिक्यङ्गैश्चतुर्भिश्च युक्ताङ्कैरिति नाटिका ॥ ११७ ॥

सट्टकम्—

सट्टकं नाटिकावत्स्यात्किंत्वेतत्प्राकृतैः कृतम् ।

प्रवेशकविहीनं च शृङ्गाराद्भुतभूषितम् ॥ ११८ ॥
चतुर्यवनिकं कार्यं वयस्यान्तं प्रकीर्तितम् ।

त्रोटकम्—

दिव्यमानुषसंयोगो यत्राङ्केऽङ्के विदूषकः ॥ ११९ ॥
त्रोटकं नाम तज्ज्ञेयं गूढनाटकलक्षणम् ।
सप्ताष्टनवपञ्चाङ्कमन्यन्नाटकवन्मतम् ॥ १२० ॥
सप्ताङ्कं स्तम्भितारम्भस्त्वष्टाङ्कं मदलेखिका[1] ।
मेनकानहुषाख्यं स्यान्नवाङ्कं परिकीर्तितम् ॥ १२१ ॥
प्रकीर्त्यते परं प्राज्ञैः पञ्चाङ्कं विक्रमोर्वशी ।

प्रेक्षणकम्—

गर्भावमर्शहीनं वा मुखनिर्वहणान्वितम् ॥ १२२ ॥
सूत्रधारविहीनं च सर्ववृत्तिसमाश्रितम् ।
नियुद्धसंफेटयुतं परिवर्तकभूषितम् ॥ १२३ ॥
मागधी शौरसेनी वा हीननायकचेष्टितम् ।
नेपथ्ये गीतनाट्यं च परत्रैव प्रयोजनम् ॥ १२४ ॥
अप्रवेशकविष्कम्भमेकाङ्कं प्रेक्षणं विदुः ।
निदर्शनमिह ज्ञेयं वस्तु वालिवधादिकम् ॥ १२५ ॥

गोष्ठी—

अथ गोष्ठी मतैकाङ्का कैशिकीवृत्तिशालिनी ।
कामशृङ्गारसंयुक्ता पञ्चषड्योषिदन्विता ॥ १२६ ॥
प्राकृतैर्नवभिः पुंभिर्दशभिर्वाप्यलंकृता ।

[1] मदनलेखा, A 2.

गर्भावमर्शसंधिभ्यां शून्या नोदात्तवाक्कृता ॥ १२७ ॥
निदर्शनं रैवतमदनिकाख्यमिहोदितम् ।

भाणिका—

अथ स्याद्भाणिकोदात्तनायिकैकाङ्कभूषिता ॥ १२८ ॥
श्लक्ष्णनेपथ्यभाङ्मध्यपुरुषा च प्रकीर्तिता ।
कैशिकीभारतीप्राया त्वङ्गैः सप्तभिरुज्ज्वला ॥ १२९ ॥

भाणिकाङ्गानि—

उपन्यासोऽथ विन्यासो विबोधः साध्वसं तथा ।
समर्पणं चानुवृत्तिः संहारश्चापि सप्तमः ॥ १३० ॥
प्रसङ्गात्कार्यकथनमुपन्यासः प्रकीर्तितः
निर्वेदवाक्यव्युत्पत्तिस्तत्र विन्यास उच्यते ॥ १३१ ॥
विबोधो भ्रान्तिनाशः स्यान्मिथ्याज्ञानं तु साध्वसम् ।
समर्पणमुपालम्भवचः स्यात्कोपविद्धया ॥ १३२ ॥
अनुवृत्तिर्निदर्शनस्योपन्यासः प्रकीर्तितः ।
समापनं तु कार्यस्य संहार इति कीर्तितः ॥ १३३ ॥
मुखनिर्वहणोपेता कामदत्ता निदर्शनम् ।

संलापः—

शृङ्गारहास्यरहितः संलाप इति कीर्तितः ॥ १३४ ॥
पुरोपरोधसंग्रामविद्रवैः कपटैर्युतः ।
कैशिकीभारतीहीनो भवेत्पाषण्डनायकः ॥ १३५ ॥
हीनोपनायकयुतः श्मशानादिसमाकुलः ।

संलापाङ्गानि—

सप्तविंशतिरङ्गानि भवन्त्यस्य यथोच्यते ॥ १३६ ॥

उत्कण्ठा चावहित्था च प्रयत्नो ग्रथनं तथा ।
आशंसा तर्कसंदेहतापोद्वेगाश्च मुग्धता ॥ १३७ ॥
आलस्यं प्रतिपत्तिश्च विलापो वाक्यमेव च ।
साधनानुगमोच्छ्वासविस्मयाश्च चमत्कृतिः ॥ १३८ ॥
विस्मृतिर्लोभसंफेटौ वैशारद्यं प्रबोधनम् ।
आश्वासश्च प्रहर्षश्च प्रसत्तिरिति कीर्तितः ॥ १३९ ॥
सलक्षणोदाहरणं व्यक्तत्वान्नात्र दर्शितम् ।
शेषं नाटकवत्सर्वं संलापः समुदाहृतः ॥ १४० ॥
निदर्शनं कनकवतीमाधवं समवेक्ष्यताम् ।

प्रस्थानम्—

दासादिनायकं दासीनायिकं द्व्यङ्कमीरितम् ॥ १४१ ॥
कैशिकीवृत्तिबहुलं बहुताललयान्वितम् ।
सुरापानसमायुक्तं तथा हीनोपनायकम् ॥ १४२ ॥
विलासोद्दिष्टसंयुक्तं प्रस्थानमिति कीर्तितम् ।
निदर्शनमिह ज्ञेयं शृङ्गारललिताह्वयम् ॥ १४३ ॥

काव्यम्—

काव्यमारभटीहीनमेकाङ्कं हास्यसंकुलम् ।
गर्भावमर्शसंधिभ्यां हीनं शृङ्गारभूषितम् ॥ १४४ ॥
खण्डमात्राद्विपदिकाभग्नतालैरलंकृतम् ।
उदात्तोक्तिसमायुक्तं बहुताललयान्वितम् ॥ १४५ ॥
निदर्शनं तु काव्यस्य विज्ञेयो माधवोदयः ।

हल्लीसकम्—

हल्लीसकं तु सप्ताष्टदशस्त्रीजनसंकुलम् ॥ १४६ ॥

संप्रयोज्यैकपुरुषं कैशिकीवृत्तिभूषितम् ।
एकाङ्कं स्यादुदात्तोक्तिबहुताललयान्वितम् ॥ १४७ ॥
निदर्शनं भवेदस्य केलिरैवतकं मतम् ।

रासकम्—

अथ रासकमेकाङ्कं सूत्रधारेण वर्जितम् ॥ १४८ ॥
सुश्लिष्टनान्दीसहितं पञ्चपात्रं द्विसंधिकम् ।
पूर्णं भाषाविभूषाद्यैर्भारतीकैशिकीयुतम् ॥ १४९ ॥
वीथ्यङ्कमण्डितं मुख्यनायिकं ख्यातनायकम् ।
उदात्तभावविन्याससंश्रितं चोत्तरोत्तरम् ॥ १५० ॥
गर्भावमर्शशून्यं च यथा स्यान्मेनकाद्विजम् ।

श्रीगदितम्—

करुणं स्त्री समासीना गायेद्यत्र पठेदपि ॥ १५१ ॥
एकाङ्कं भारतीप्रायं तच्छ्रीगदितमुच्यते ।
गर्भावमर्शरहितं प्रख्यातोदात्तनायकम् ॥ १५२ ॥
प्रसिद्धनायकं ज्ञेयं यद्वत्क्रीडारसालकम् ।

लासिका—

शृङ्गारबहुलैकाङ्का त्रिसंधिर्न्यूननायिका ॥ १५३ ॥
स्वल्पनृत्ताल्पनेपथ्या पीठमर्देन भूषिता ।
विदूषकविटोपेता दशलास्याङ्गभूषिता ॥ १५४ ॥
लासिका सा समुद्दिष्टा यथा वीणावती मता ।

दुर्मल्लिका—

दुर्मल्ली चतुरङ्का स्यात्कैशिकीभारतीयुता ॥ १५५ ॥

विगर्भा नागरनरा न्यूननायकभूषिता ।
त्रिनाडिः प्रथमाङ्कः स्याद्विटक्रीडामयो भवेत् ॥ १५६ ॥
द्वितीयः पञ्चनाडिः स्याद्विदूषकविलासवान् ।
षण्नाडिकस्तृतीयस्तु पीठमर्दविलासवान् ॥ १५७ ॥
चतुर्थो दशनाडिः स्यादङ्कः क्रीडितनागरः ।
निदर्शनं भवेदत्र यथा बिन्दुमती मता ॥ १५८ ॥

नाट्यरासकम्—

नाट्यरासकमेकाङ्कं बहुताललयात्मकम् ।
हास्यशृङ्गारसंयुक्तं दशलास्याङ्गभूषितम् ॥ १५९ ॥
उदात्तनायकं चैव पीठमर्दोपनायकम् ।
द्वितीयसंधिशून्यं स्याद्वासकसज्जात्र नायिका ॥ १६० ॥
निदर्शनं दर्शनीयं स्याद्विलासवती यथा ।

उल्लाप्यम्—

उल्लाप्यं दिव्यचरितं मुखनिर्वहणान्वितम् ॥ १६१ ॥
शृङ्गारहास्यकारुण्ययुतमेकाङ्कभूषितम् ।
बहुपुस्तं गीतमयं चतुरोज्ज्वलनायकम् ॥ १६२ ॥
[1]नाट्यप्रबन्धनिकुरुम्बमिदं विभाति
दानं त्वदीयमिव मन्नधरातलेन्द्र ॥ १६३ ॥

इति श्रीमदमृतानन्दयोगिप्रवरविरचितेऽलंकारसंग्रहे
रूपकनिरूपणं नाम नवमः परिच्छेदः ।

---

[1] अस्य श्लोकस्यापरमर्धं न दृश्यते ।

दशमः परिच्छेदः

नाट्यालंकाराः—

सिद्धिः प्राप्तिर्विचारश्चानुनयस्तदनन्तरम् ।
उद्दिष्टमपि दाक्षिण्यं प्रसिद्धिर्गर्हणं तथा ॥ १ ॥
पश्चात्तापः स्पृहा क्षोभ आक्रन्दः परिहारकम् ।
नीतिरुत्तेजनं शोभाभिमानः संशयस्तथा ॥ २ ॥
तुल्यतर्कोऽक्षमा चैव व्यवसायो विमर्शनम् ।
युक्तिः प्रोत्साहनं चैव साहाय्यं च निवेदनम् ॥ ३ ॥
अभिज्ञानं च पृच्छा चातिशयो गुणकीर्तनम् ।
[1]इति त्रिंशदलंकाराः प्रायो नाट्येषु संगताः ॥ ४ ॥

सिद्धिः—

सिद्धिरिष्टार्थसंसिद्धेरनेकेषामुदाहृतम् ।

यथा—

" हे भूतधात्रि यदि तावदहं विशुद्धा
तन्मे वरं त्वमिह देहि वृणे वरं च ।
हे विष्णुवासवमहेश्वरचन्द्रसूर्या
जन्मान्तरेषु भविता प्रभुरेव रामः ॥ "

[1] विषयोऽयं नाट्यशास्त्रे षोडशाध्याये विस्तरेणोपवर्णितः, निर्णयसागरमुद्रितपुस्तके १६९ तमे पृष्ठे द्रष्टव्यः ।

प्राप्तिः—

प्राप्तिः सा समुदायस्य ज्ञानं यच्चैकदेशतः ॥ ५ ॥

यथा—

“ हंस प्रयच्छ मे कान्तां गतिस्तस्या हृता त्वया ।
संभावितैकदेशेन स्तेयं यदभियुज्यते ॥ ”

विचारः—

विचारः स हि विज्ञेयः संशये निर्णयस्तु यः ।

यथा—

“ असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥ ”

अनुनयः—

वचसा कर्मणा प्रीतिर्यस्मिन्ननुनयो हि सः ॥ ६ ॥

यथा—

“ परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे ।
समुद्ररशना चोर्वी सखी च युवयोरियम् ॥ ”

उद्दिष्टम्—

उद्दिष्टं स्यात्परोक्षे च प्रत्यक्षे चार्थकीर्तनम् ।

परोक्षे यथा—

“ तस्मिन् जीवति दुर्धर्षे हतमप्यहतं बलम् ।
तस्मिंस्तु गमितप्राणे जीवन्तोऽपि मृता वयम् ॥ ”

प्रत्यक्षे यथा—

यथा—

" हा धिक् प्रियतमा सेयं दुःसंस्थानमलीमसा ।
सर्वथा प्रत्यभिज्ञेया मूर्तीभवति तद्यथा ॥ "

दाक्षिण्यम्—

दाक्षिण्यं श्लक्ष्णया वाचा परचित्तानुवर्तनम् ॥ ७ ॥

" प्रसाधय पुरीं लङ्कां राजा त्वं हि विभीषण ।
आर्येणानुगृहीतोऽसि निर्विघ्नः सिद्धिमन्तरा ॥ "

प्रसिद्धिः—

प्रसिद्धिर्लोकसिद्धार्थैरुत्कृष्टैरर्थसाधनम् ।

यथा—

" सूर्याचन्द्रमसौ यस्य मातामहपितामहौ ।
स्वयं वृतः पतिर्द्वाभ्यामुर्वश्या च भुवा च यः ॥ "

गर्हणम्—

तद् गर्हणं भवेद्यत्तु दोषोद्भेदेन कुत्सनम् ॥ ८ ॥

यथा—

" अन्यासक्तमवध्यं च निघ्नन् क्षात्त्रपराङ्मुखः ।
न कथं लक्ष्मणो धन्वी लज्जते हृदयादपि ॥ "

पश्चात्तापः—

पश्चात्तापोऽनुतापस्तु कृत्वाकार्यं तु यो भवेत् ।

“ ([1]प्लवगप्रवरं) निघ्नन् भ्रातृयुद्धाभियोगिनम् ।
अहं सूर्यकुलस्याद्य कलङ्कः किं कृतं मया ॥ ”

स्पृहा—

स्पृहा यस्त्वभिलाषः स्याद्वस्तुनो रामणीयके ॥ ९ ॥

यथा—

“ जीवत्सु तातपादेषु नवे दारपरिग्रहे ।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥ ”

क्षोभः—

अधिक्षेपवचोयुक्तः कोपजः क्षोभ उच्यते ।

यथा—

“ त्वया तपस्विचाण्डाल प्रच्छन्नवधवर्तिना ।
न केवलं हतो वाली स्वात्मा च परलोकतः ॥ ”

आक्रन्दः—

शोकप्रलाप आक्रन्दो नाट्यविद्भिरुदीरितः ॥ १० ॥

यथा—

“ हा विधे नष्टपक्षेण मय्येव परिवर्तसे ।
हतस्तातो हृता पत्नी भ्राता च निहतो युधि ॥ ”

परिहारः—

परिहारः स विज्ञेयः कृतानुचितमार्जनम् ।

[1] मातृकायां पदमिदं विलुप्तम् । तथाप्यौचित्यादुन्नीय संयोजितम् ।

यथा—

“ प्राणप्रयाणदुःखार्तं उक्तवानस्म्यनक्षरम् ।
तत्क्षमस्व विभो किंच सुग्रीवस्ते समर्पितः ॥ ”

नीतिः—

न्यायानुवृत्तिरेवात्र नीतिरित्युच्यते यथा ॥ ११ ॥

“ स्नेहं प्रति न पुत्रेषु विशेषः कश्चिदस्ति मे ।
किंतु न्यायं पुरस्कृत्य मया ज्येष्ठोऽभिषिच्यते ॥ ”

उत्तेजनम्—

उत्तेजनं तु कार्यार्थं यत्रानक्षरमुच्यते ।

यथा—

“ इन्द्रजिच्चण्डवीर्योऽसि नाम्नैव बलवानसि ।
कः प्रच्छन्नस्वरूपेण युध्यतेऽस्मद्भयाकुलः ॥ ”

शोभा—

सिद्धेः पदं समं श्लिष्टं साध्यं शोभाभिधीयते ॥ १२ ॥

यथा—

“ सद्वंशसंभवः शुद्धः कोटिदोऽपि गुणान्वितः ।
कामं धनुरिव क्रूरो वर्जनीयः सतां प्रभुः ॥ ”

अभिमानः—

अभिमानोऽपरित्यागो दर्पदुःखसुखस्य च ।

यथा—

“ खरेन्द्रजिद्दूषणकुम्भकर्णा गताः किमेतेन गता गतास्ते ।
अहं च गच्छामि यदि प्रणाशं तथापि सीतां न समर्पयामि ॥ ”

संशयः—

अनिश्चयेन वाक्येन समाप्तिः संशयो यथा ॥ १३ ॥

"इयं स्वर्गाधिनाथस्य लक्ष्मीः किं यक्षकन्यका ।
अथवा विपिनस्यैव देवता किमु पार्वती ॥"

तुल्यतर्कः—

स्यादुत्प्रेक्षादिसंपन्नस्तुल्यतर्कस्तु तद्यथा ।

"तरङ्गभ्रूलताफेनं दुकूलमिव बिभ्रती ।
मन्ये परिणता सेयं सरिद्भावेन भामिनी ॥"

अक्षमा—

अक्षमा त्वहितानां या परिभूतिर्न सह्यते ॥ १४ ॥

यथा—

"सीताहरणदुर्वृत्तपरिपाकफलोन्मुखः ।
स्वकुलस्यान्तकः स त्वमाशराग्रे भवामि ते ॥"

व्यवसायः—

कार्याद्यध्यवसायो यस्तन्निश्चयपरं वचः ।

यथा—

"कियन्मात्रमकूपारः कियन्मात्रं च सा पुरी ।
कियन्मात्रं दशास्योऽपि क्रुद्धस्य मम धन्विनः ॥"

विमर्शः—

विमर्शो दुःखदीनानामनिष्टफलनिश्चयः ॥ १५ ॥

यथा—

" विद्वान् प्रणाशं समरे स्वयं च न तावदात्मानमहं ब्रवीमि ।
महामुनेर्विश्रवसः कुलेऽस्मिन् निवापबीजं किमपीह न स्यात् ॥ "

युक्तिः—

अवधारणमर्थस्य केनचिद्युक्तिरिष्यते ।

यथा—

" यदि समरमपास्य नास्ति मृत्यो-
भयमिति युक्तमितोऽन्यतः प्रयातुम् ।
अथ मरणमवश्यमेव जन्तोः
किमिति मुधा मलिनं यशः कुरुध्वम् ॥ "

प्रोत्साहनम्—

प्रोत्साहनं स्यादुत्साहगिरा कस्यापि योजनम् ॥ १६ ॥

यथा—

" कालरात्रिकरालेयं स्त्रीति किं विचिकित्ससि ।
तज्जगत्त्रितयं त्रातुं तात ताडय ताडकाम् ॥ "

साहाय्यम्—

साहाय्यमानुकूल्येन कार्ये कस्यापि योजनम् ।

यथा—

" रन्ध्राणि तु सजातीयो दुर्लक्ष्याण्यपि पश्यति ।
इन्द्रजिन्निधनं नाथ लक्ष्मणानुचरे मयि ॥ "

निवेदनम्—

भूतस्य कथनं भाविसूचनाय निवेदनम् ॥ १७ ॥

यथा—

"वानरः क्षत्त्रियः कोऽपि शत्रुः क्षुद्रो न गण्यताम् ।
वालिनं कार्तवीर्यं च स कथं विस्मृतो भवान् ॥"

अभिज्ञानम्—

अभिज्ञानं यदुद्बोधः पूर्वदृष्टस्य केनचित् ।

यथा—

"आकृतेः किंचिदुल्लेखो विभावयति लक्षणम् ।
महतोपप्लवेनैव पीडितं चन्द्रमण्डलम् ॥"

पृच्छा—

पृच्छान्वेषणमर्थस्य स्यादर्थाभ्यर्थनापरम् ॥ १८ ॥

यथा—

"भवद्भिः सर्वाङ्गप्रकृतिरमणीया कुलवधू-
रिहास्ते दृष्टा वा विदितमथवास्याः किमु भवेत् ।
वयोऽवस्थां तस्याः शृणुत सुभगो यत्र मदनः
प्रगल्भव्यापारश्चरति हृदि मूर्खश्च वपुषि ॥"

अतिशयः—

**गुणमेकस्य संकीर्त्य तस्यातिशयवर्णनम् ।
क्रियते यत्र वाक्यार्थः स स्यादतिशयो यथा ।**

यथा—

" विधायापूर्वपूर्णेन्दुमस्या मुखमभूद् ध्रुवम् ।
धाता निजासनाम्भोजविनिमीलनदुःस्थितः ॥ "

गुणकीर्तनम्—

इष्टसिद्धौ गुणानां तु कीर्तनं गुणकीर्तनम् ॥ १९ ॥

यथा—

" शिरोऽर्चितशिवः शौर्यवशीकृतजगत्त्रयः ।
सुरस्त्रीदुर्लभः सोऽहं मनस्वी च दशाननः ॥ "

नानाविधैरलंकारैर्नाट्यविद्या विभूषिता ।
मोदाय भवतो भूयान्मनसो मन्नभूपते[1] ॥ २० ॥

इति श्रीमदमृतानन्दयोगिप्रवरविरचितेऽलंकारसंग्रहे
नाट्यालंकारनिर्णयो नाम दशमः परिच्छेदः ।

---

[1] मोदाय कल्पतां नित्यं भवतो मन्मभूपते A 2.

एकादशः परिच्छेदः

अथ चाटुप्रबन्धानां लक्षणं कथ्यतेऽधुना ।

मुक्तकादिविभागः—

मुक्तकं पद्यमेकं स्याद् द्विकं पद्यद्वयं मतम् ॥ १ ॥
त्रिकं त्रयेण पद्यानां पञ्च रत्नानि पञ्चकम् ।
अष्टकं गजमाला स्यान्नवकं रत्नमालिका ॥ २ ॥
दशभिर्दशकं प्रोक्तं द्वादशेन्दुकला स्मृता ।
सप्तविंशतिपद्यानि नाम्ना तारावली मता ॥ ३ ॥
त्रिंशता त्रिंशिका पञ्चाशता पञ्चाशिकेष्यते ।
शतेन शतकं प्रोक्तमष्टोत्तरशतं परम् ॥ ४ ॥
वृत्तैरभिन्नैर्भिन्नैर्वा कार्यमेकं यथारुचि ।
काव्यमप्येकसर्गादि द्वात्रिंशदवधि स्मृतम् ॥ ५ ॥

उदाहरणम्—

अथोदाहरणादीनां लक्षणं कथ्यतेऽधुना ।
कल्पनीयानि पद्यानि सप्त सप्तविभक्तिभिः ॥ ६ ॥
संबोधनात्मिका चान्ते विभक्तिस्त्वष्टमी भवेत् ।
शक्करीप्रभृतीनि स्युश्छन्दांस्यस्य यथारुचि ॥ ७ ॥
रीतिः प्रधाना गौडीया गतिः स्याद् द्रुतमध्यमा ।
ओजःप्रसाधनाः शब्दाः सानुप्रासाः क्वचित्क्वचित् ॥ ८ ॥
विभक्तिघटना चात्र यथाकामं क्रमेण वा ।

तत्राद्यं मालिनीवृत्तं जयेत्यादिसमन्वितम् ॥ ९ ॥
गद्यात्मकदलान्यष्टौ प्रत्येकं सयतीनि च ।
अन्ते तूत्कलिका कार्या समस्तैकपदात्मिका ॥ १० ॥
अन्ते पद्यसमायुक्ता यत्यनुप्रासशोभिनी ।
चतुरुत्कलिका स्याद्वा विभक्त्याभासलाञ्छिता ॥ ११ ॥
कलिकोत्कलिकामृष्टनव्यतालयक्रमा ।
प्रतिपद्यं भवेन्नेतृनाम तत्तद्विभक्तिमत् ॥ १२ ॥

विभक्तिदेवताः—

विराजन्ती कीर्तिमती सुभागा भोगमालिनी ।
कलावती कान्तिमती कमला जयवत्यपि ॥ १३ ॥
एता विभक्त्यधिष्ठाच्यो देवताः कथिता बुधैः ।
ददत्येताः स्तुतिप्रीताः स्वस्वनामसमं फलम् ॥ १४ ॥
वाक्यमेकं च कर्तव्यमन्ते सार्वविभक्तिकम् ।
आर्या वान्यतमां कुर्यात्कविश्रुत्याख्यया ततः ॥ १५ ॥
अप्राकृता प्राकृता वा प्राकृतोन्मिश्रितापि वा ।
देशिभिश्च पदैर्युक्ता भाषाणां चैव संचयैः ॥ १६ ॥
वंशवीर्यश्रुताद्यैश्च युक्तोदाहरणं मतम्[1] ।

[1] "येन केनापि तालेन गद्यपद्यसमन्वितम् ।
जयेत्युपक्रमं मालिन्यादि प्रासविचित्रितम् ।
तदुदाहरणं नाम विभक्त्यष्टकसंयुतम् ॥

यत्रादौ जयेत्युपक्रमं मालिनीवृत्तं निगद्यते, अनन्तरम् अपिचेत्युपक्रम्याष्ट वाक्यानि सप्रासानि सतालानि प्रतिविभक्ति कथ्यन्ते, अनन्तरं विभक्त्याभासस्तदुदाहरणं नाम काव्यम् ।"

इति साहित्यकल्पद्रुमे लक्षणमुक्तम् ।

उदाहरणे नायकाः—

अमुष्य नायकाः प्रोक्ता देवा दैत्या महीसुराः ॥ १७ ॥
गुरवः क्षोणिपालाश्च सामन्ताः सचिवादयः ।

अङ्गुली—

विभक्तिसप्तकयुता संध्या चैव विना कृता ॥ १८ ॥
अङ्गुलीति समाख्याता सद्भिश्चाटुविशारदैः ।

कल्याणी—

केवलं कलिकासंगात्कल्याणीति निगद्यते ॥ १९ ॥

उत्फुल्लकवती—

केवलोत्कलिकासंगादुत्फुल्लकवती भवेत् ।

फलोदाहरणम्—

यस्यास्तूत्कलिकास्थाने केवलार्या प्रयुज्यते ॥ २० ॥
सा फलोदाहरणं वा स्यादार्यासञ्ज्ञान्न भिद्यते ।

विभक्तिनामानि—

केवला प्रथमा वाणी द्वितीया केवला झरी ॥ २१ ॥
तृतीया केवला वापी चतुर्थी केवला फणी ।
पञ्चमी केवला सारी षष्ठी मोरीति कथ्यते ॥ २२ ॥
सप्तमी खलिका प्रोक्ता संबुद्धिः सरसावती ।
भिन्नैर्वर्णैर्भिन्ननामसंभवे च तथा भवेत् ॥ २३ ॥
सर्ववाक्यं च कर्तव्यं कविनायकलाञ्छितम् ।

नवमाणिक्यमाला—

एषैव गद्यरहिता नवमाणिक्यमालिका ॥ २४ ॥

नक्षत्रमाला—

एषैव च त्रिगुणिता भवेन्नक्षत्रमालिका ।

भोगावली—

रसः शृङ्गार एव स्याद्भोगावल्याः प्रपञ्चने ॥ २५ ॥
अनुषङ्गेण मिलितो वीरोऽपि स्यात्क्वचित्क्वचित् ।
वर्णनीयाः क्रमात्साङ्गवीरभोगादयो गुणाः ॥ २६ ॥
आशीःपद्यसमायुक्ता प्रथमे विरतावपि ।
अष्टभिर्वा षोडशभिर्विंशत्या वा पदैर्युता ॥ २७ ॥
दलानि षड् वा चत्वारि प्रत्येकं सयतीनि च ।
मध्ये भवेयुरथवा यमिताद्यक्षरैः क्वचित् ॥ २८ ॥
गतेरपि प्रयोगः स्याद्यथारीति समृद्धितः ।
तत्तदर्थावसानेऽस्य विरतिः स्यात्पदे पदे ॥ २९ ॥
देव त्वं जय वीर त्वं धीर जीवादिकं पदम् ।
तत्तत्स्थाने प्राकृतादिभाषाभिर्बिरुदाश्रितैः ॥ ३० ॥
भोगोपजृम्भितैर्गद्यपद्यैः सेयं सपल्लवैः ।
[1]भोगावली च देशर्तुभावाङ्कज्ञानचातुरी ॥ ३१ ॥

[1] पद्यं परतो गद्यं तच्च चतुर्भूतखण्डिकारुचिरम् ।
क्वचन शृङ्खलिकाक्रमनियमव्याहारभासुराकारम् ॥
तदनु च मात्रायतिभिः संदब्धा षड्दली भवेत्सरसा ।
तदनु च पूर्ववदेकं पद्यं यत्रैष एककः स्कन्धः ॥
स्कन्धैरष्टभिरेभिर्ग्रथिताप्यथवा चतुर्भिरभ्यस्ता ।
पट्टाभिषिक्तराजप्रवरार्हा किंच देवताभ्युचिता ।
गौडीयरीतिसुभगा संबुद्धयन्तैः पदैः परं प्रचुरा ।
अर्थैर्मङ्गलशंसिभिराकीर्णा भोगवर्णनाभरिता ॥

विरुदावली—

वर्णयेद्वीरलब्धांश्च तांस्तान् श्लाघ्यादिकान् गुणान् ।
चतुर्भिर्लघुभिः पद्यप्रान्ते संमदकारिणी ॥ ३२ ॥
मङ्गलानि फलानि स्युः प्रथमश्रवणादपि ।
वृत्तेनैकेन नेतारं वर्धयेदाशिषान्तिमे ॥ ३३ ॥
ग्रन्थसंख्या शतं षष्टिरत्र ख्यातोत्तमा बुधैः ।
भोगावलिसमायुक्ता देवानां भूभुजामपि ॥ ३४ ॥
वर्णनेन परं विद्यात् प्रायशो विरुदावलीम्[1] ।
द्वाभ्यां चतसृभिर्वापि पञ्चभिः षड्भिरेव वा ॥ ३५ ॥
भाषाभिर्विहिताभिः स्याद्यदि वा देशभाषितैः ।
कुलक्रमागतैर्वापि स्वापदाननिदर्शकैः ॥ ३६ ॥
पदैरपि च सा यैः स्यात्तत्तदर्थविनाकृतैः ।

गम्भीरदेवधीरप्रमुखपदोज्ज्वलितगद्यपद्यान्ता ।
भोगोपकरणपूर्णऋतुमासदिनादिपूर्णभोगाढ्या ॥
प्रकटितनायकनामा प्रविमलिताशेषपद्यसंभिन्ना ।
आद्ये चान्त्ये च पद्ये विहिताशीर्वादवाक्यसंघटना ॥
भोगावलीति कथिता कविभिश्चाटुप्रबन्धलक्ष्मज्ञैः ॥"

इति साहित्यकल्पद्रुमे लक्षणमुक्तम् ।

आदौ पद्यं परतो भवेयुरष्टौ च कोरकाः सरसाः ।
तदनु च चत्वारः स्युस्तालाश्चत्वारि पल्लवान्यनु च ॥
एकोऽयं स्कन्धः स्याच्चतुर्भिरथवाष्टभिर्भवति ।
विरुदावलीति कथिता विरुदैर्वंशागतैः समायुक्ता ॥
स्वभुजार्जितैश्च विरुदैस्तत्तद्धरणीशविजयसंपन्नैः ।
अपि सार्वभौमदत्तैर्विरुदैराटोपजृम्भितैः कथिता ॥
गजतुरगरथारोहणसंकुलशस्त्रास्त्रनैपुणैर्भरिता ।
विरुदैर्यदि संघटिता विरुदावलिरित्युदीर्यते कविभिः ॥

नानापुरातनक्ष्माभृद्भिरुदारोहणैरपि ॥ ३७ ॥
वाहनारोहशस्त्रास्त्रप्रयोगैर्भोगवर्णनैः ।
गुणिनां वर्णनैश्चापि विनयक्रमशालिभिः ॥ ३८ ॥
गौडरीत्या विधातव्या सानुप्रासा सपल्लवा ।
आद्यन्तयोः स्यादार्या वा गाथा वा मङ्गलात्मिका ॥ ३९ ॥
इत्येवं लक्षणानि स्युर्लक्षणानीतराणि वा ।

गुणावली—

सद्गुणारोपणं यत्र नेतुः सैव गुणावली ॥ ४० ॥
गुणाः परोपकारार्था वर्ण्याः सर्वे प्रधानतः ।
दलानि चाष्टौ चत्वारि सानुप्रासयतीनि च ॥ ४१ ॥
मात्राभिरथवा वर्णैः समानि स्युः परस्य च ।
तादृग्वर्णानि सर्वाणि संस्कृतेन क्वचित्क्वचित् ॥ ४२ ॥

गुणावल्यां रसः—

अस्याः शृङ्गार एकः स्यात्क्वचित्तत्राद्भुतो रसः ।
दलपङ्क्तिविरामेषु देवेत्यादिपदं न्यसेत् ॥ ४३ ॥
आदौ समासभूयिष्ठमन्ते स्याद् वृत्तगन्धि च ।
गद्याद्यपरमाद्यान्मध्ये हि पदमेव वा ॥ ४४ ॥
पुरे जनपदे रम्ये देशे या गुणसंपदः ।
नेतारं वर्णयेत्ताभिरेषैव स्याद् गुणावली[1] ॥ ४५ ॥

[1] यद्येवमेव रचिता बिरुदव्यतिरिक्तसकलगुणपूर्णा ॥
आहुर्गुणावलीं तां गुणगणगणनीयसकलमुनिनन्द्या ।

इति साहित्यकल्पद्रुमे लक्षणमुक्तम् ।

रगला—

चतसृभिर्भवेत् षड्भिर्भाषाभिर्विलसत्क्रमम् ।
एकैकभाषयैकैकं पद्यं सर्वविभक्तिभिः ॥ ४६ ॥
रगलापि तथापि स्यात्तत्र तत्र सपल्लवा ।

चक्रवालम्—

श्लोकावाद्यन्तयोर्नेतृमङ्गलार्थौ न्यसेद् बुधः ॥ ४७ ॥
तिसृभिर्वाथ वृत्तं चेद्भाषाभिर्मण्डलक्रमात् ।
उत्तमं चक्रवालं स्यादन्यूनानधिकं मतम् ॥ ४८ ॥

लोकोत्तरम्—

रसादीन् वर्णयेद्भूतिगुणकर्मानुसारतः ।
युक्तमेतद्विशेषेण सिद्धिं च विजिगीषुभिः ॥ ४९ ॥
द्वात्रिंशद्गद्यसंयुक्तं गद्याग्रैः पल्लवैर्युतम् ।
चतुर्धा भिन्नरूपेण व्यस्तं सस्वरबन्धनम् ॥ ५० ॥
तालैर्द्वादशभिर्युक्तं लोकोत्तरमुदाहृतम् ।

त्यागघोषणम्—

[1] . . . . . . परं वेश्यः स . . . . ॥ ५१ ॥
त्यागादयो गुणा यस्यामूह्यन्ते कविभिः कृतौ ।
पूर्वाद्यास्तासु तत्रत्यानाहूया . . . . . . ॥ ५२ ॥
. . . . ।
. . . . . . गद्यमेकं चतुर्भिः पल्लवैर्युतम् ॥ ५३ ॥
चतुर्धैष समावृत्तं चतुरक्षरबन्धनम् ।

[1] अत्राक्षराणि मातृकायां भ्रष्टानि ।

आशीराद्यन्तयोः कार्या नेतुः पद्यद्वयेन तु ॥ ५४ ॥
एवं पद्यैश्च गद्यैश्च सा भवेत्त्यागघोषणम्[1] ।

चतुर्भद्रम् —

अथ संख्या भवेत् षष्टिः शतं वा स्याद्विशेषतः ॥ ५५ ॥
अस्यास्तु सर्वे नेतारो भवेयुस्त्यागिनः सदा ।
गद्यं पद्यं च तालं च सानुतालं चतुर्विधम् ॥ ५६ ॥
देववीरजयेत्यादिसंबुद्धिश्चान्त एव च ।
स्याच्चतुर्धा च वृत्तं स्याच्चतुर्भद्रमितीरितम् ॥ ५७ ॥
चाटुप्रबन्धैस्त्वयि चारुकीर्तिरुदारवर्णैरुपलाल्यमाना ।
रक्ता सती राजगुरो विचित्रं मन्नक्षमानाथ मरालशुभ्रा ॥ ५८ ॥

इति श्रीमदमृतानन्दयोगिप्रवरविरचितेऽलंकारसंग्रहे
चाटुप्रबन्धलक्षणं नामैकादशः परिच्छेदः ।

अलंकारसंग्रहः संपूर्णः ।

शुभमस्तु ।

---

1 "पद्यं तदनु च गद्यं तदुपरि च त्रीणि पल्लवानि ततः ।
तत्त्यागघोषणं स्यादन्यत्सर्वं यथाचतुर्भद्रम् ॥"
इति साहित्यकल्पद्रुमे लक्षणमुक्तम् ।

APPENDIX I

[Please refer to the footnote on page 132 of the text.]

नाट्यशास्त्रे पञ्चमोऽध्यायः

"यस्माद्रङ्गप्रयोगोऽयं पूर्वमेव प्रयुज्यते ।
तस्मादयं पूर्वरङ्गो विज्ञेयो द्विजसत्तमाः ॥ ७ ॥
अस्याङ्गानि तु कार्याणि यथावदनुपूर्वशः ।
तन्त्रीभाण्डसमायोगैः पाठ्ययोगकृतैस्तथा ॥ ८ ॥
प्रत्याहारोऽवतरणं तथा ह्यारम्भ एव च ।
आश्रावणा वक्त्रपाणिस्तथा च परिघट्टना ॥ ९ ॥
संघोटना ततः कार्या मार्गासारितमेव च ।
ज्येष्ठमध्यकनिष्ठानि तथैवासारितानि च ॥ १० ॥
एतानि तु बहिर्गीतान्यन्तर्यवनिकागतैः ।
प्रयोक्तृभिः प्रयोज्यानि तन्त्रीभाण्डकृतानि च ॥ ११ ॥
ततः सर्वैस्तु कुतपैः संयुक्तानीह कारयेत् ।
विघट्य वै यवनिकां नृत्तपाठ्यकृतानि तु ॥ १२ ॥
गीतानां मद्रकादीनां योज्यमेकं तु गीतकम् ।
वर्धमानमथापीह ताण्डवं यत्र युज्यते ॥ १३ ॥
ततश्चोत्थापनं कार्यं परिवर्तनमेव च ।
नान्दी शुष्कावकृष्टा च रङ्गद्वारं तथैव च ॥ १४ ॥

चारी चैव ततः कार्या महाचारी तथैव च ।
त्रिकं प्ररोचना चापि पूर्वरङ्गे भवन्ति हि ॥ १५ ॥
एतान्यङ्गानि कार्याणि पूर्वरङ्गविधौ द्विजाः ।
एतेषां लक्षणमहं व्याख्यास्याम्यनुपूर्वशः ॥ १६ ॥
कुतपस्य तु विन्यासः प्रत्याहार इति स्मृतः ।
तथावतरणं प्रोक्तं गायकानां निवेशनम् ॥ १७ ॥
परिगीतक्रियारम्भ आरम्भ इति कीर्तितः ।
आतोद्यरञ्जनार्थं तु भवेदाश्रावणाविधिः ॥ १८ ॥
वाद्यवृत्तिविभागार्थं वक्त्रपाणिर्विधीयते ।
तन्त्र्योजःकरणार्थं तु भवेच्च परिघट्टना ॥ १९ ॥
तथा पाणिविभागार्थं भवेत्संघोटनाविधिः ।
तन्त्रीभाण्डसामायोगान्मार्गासारितमिष्यते ॥ २० ॥
कालपातविभागार्थं भवेदासारितक्रिया ।
कीर्तनाद्देवतानां च ज्ञेयो गीतविधिस्तथा ॥ २१ ॥
अतः परं प्रवक्ष्यामि चोथापनविधिक्रियाम् ।
यस्मादुत्थापयन्त्यादौ प्रयोगं नान्दिपाठकः ॥ २२ ॥
पूर्वमेव तु रङ्गेऽस्मिंस्तस्मादुत्थापनं स्मृतम् ।
यस्माच्च लोकपालानां परिवृत्य चतुर्दिशम् ॥ २३ ॥
वन्दनानि प्रकुर्वन्ति तस्माच्च परिवर्तनम् ।
आशीर्वचनसंयुक्ता नित्यं यस्मात्प्रयुज्यते ॥ २४ ॥
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ।
अत्र शुष्काक्षरैरेव ह्यवकृष्टा ध्रुवा यतः ॥ २५ ॥
तस्माच्छुष्कावकृष्टेयं जर्जरश्लोकदर्शिका ।
यस्मादभिनयस्तत्र प्रथमं ह्यवतार्यते ॥ २६ ॥

रङ्गद्वारमतो ज्ञेयं वागङ्गाभिनयात्मकम् ।
शृङ्गारस्य प्रचरणाच्चारी संपरिकीर्तिता ॥ २७ ॥
रौद्रप्रचरणाच्चापि महाचारीति कीर्तिता ।
विदूषकः सूत्रधारस्तथा वै पारिपार्श्विकः ॥ २८ ॥
यत्र कुर्वन्ति संलापं तच्चापि त्रिगतं स्मृतम् ।
उपक्षेपेण कार्यस्य हेतुयुक्तिसमाश्रिता ॥ २९ ॥
सिद्धेनामन्त्रणा या तु विज्ञेया सा प्ररोचना ।
अतः परं प्रवक्ष्यामि ह्याश्रावणविधिक्रियाम् ॥ ३० ॥
बहिर्गीतविधौ सम्यगुत्पत्तिं करणं तथा ।
चित्रदक्षिणवृत्ते तु सप्तरूपे प्रवर्तिते ॥ ३१ ॥
सोपोहने सनिर्गीते देवस्तुत्यभिनन्दिते ।
नारदाद्यैश्च गन्धर्वैः सभायां देवदानवाः ॥ ३२ ॥
निर्गीतं श्राविताः सम्यग्लयतालसमन्वितम् ।
तच्छ्रुत्वा तु सुखं गानं देवस्तुत्यभिनन्दितम् ॥ ३३ ॥
अभवन् क्षुभिताः सर्वे मात्सर्याद्दैत्यराक्षसाः ।
संप्रधार्य च तेऽन्योन्यमित्यवोचन्नवस्थिताः ॥ ३४ ॥
निर्गीतं तु सवादित्रमिदं गृह्णीमहे वयम् ।
सप्तरूपेण संतुष्टा देवाः कर्मानुकीर्तनात् ॥ ३५ ॥
वयं गृह्णीम निर्गीतं तुष्यामोऽत्रैव वै वयम् ।
ते तत्र तुष्टा दैत्यास्तु साधयन्ति पुनः पुनः ॥ ३६ ॥
रुष्टाश्चापि ततो देवाः प्रत्यभाषन्त नारदम् ।
एते तुष्यन्ति निर्गीते दानवाः सह राक्षसैः ॥ ३७ ॥
प्रणश्यतु प्रयोगोऽयं कथं वै मन्यते भवान् ।
देवानां वचनं श्रुत्वा नारदो वाक्यमब्रवीत् ॥ ३८ ॥

धातुवाद्याश्रयकृतं निर्गीतं मा प्रणश्यतु ।
किंतूपोहनसंयुक्तं धातुवाक्यविभूषितम् ॥ ३९ ॥
भविष्यतीदं निर्गीतं सप्तरूपविधानतः ।
निर्गीतेनावबद्धास्तु दैत्यदानवराक्षसाः ॥ ४० ॥
न क्षोभं न विघातं च करिष्यन्तीह तोषिताः ।
एतन्निर्गीतमेवं तु दैत्यानां स्पर्धया द्विजाः ॥ ४१ ॥
देवानां बहुमानेन बहिर्गीतमिदं स्मृतम् ।
धातुभिश्चित्रवीणायां गुरुलघ्वक्षरान्वितम् ॥ ४२ ॥
वर्णालंकारसंयुक्तं प्रयोक्तव्यं बुधैरथ ।
निर्गीतं गीयते यस्मादपदं वर्णयोजनात् ॥ ४३ ॥
असूयया च देवानां बहिर्गीतमिदं स्मृतम् ।
निर्गीतं यन्मया प्रोक्तं सप्तरूपसमन्वितम् ॥ ४४ ॥
उत्थापनादिकं यच्च तस्य कारणमुच्यते ।
तुष्यन्त्यप्सरसस्तत्र कृतेऽवतरणे द्विजाः ॥ ४५ ॥
आश्रावणायां युक्तायां दैत्यास्तुष्यन्ति सर्वशः ।
वक्त्रपाणौ कृते चैव नित्यं तुष्यन्ति दानवाः ॥ ४६ ॥
परिघट्टनया तुष्टा युक्तया रक्षसां गणाः ।
संघोटनाक्रियायां च तुष्यन्त्यपि च गुह्यकाः ॥ ४७ ॥
मार्गासारितमासाद्य तुष्टा यक्षा भवन्ति हि ।
गीतकेषु प्रयुक्तेषु देवास्तुष्यन्ति नित्यशः ॥ ४८ ॥
वर्धमाने प्रयुक्ते तु रुद्रस्तुष्यति सानुगः ।
तथा चोत्थापने युक्ते ब्रह्मा तुष्टो भवेदिह ॥ ४९ ॥
तुष्यन्ति लोकपालाश्च प्रयुक्ते परिवर्तने ।
नान्दीप्रयोगेऽथ कृते प्रीतो भवति चन्द्रमाः ॥ ५० ॥

युक्तायामवकृष्टायां प्रीता नागा भवन्ति हि ।
तथा शुष्कावकृष्टायां प्रीतः पितृगणो भवेत् ॥ ५१ ॥
रङ्गद्वारे प्रयुक्ते तु विष्णुः प्रीतो भवेदिह ।
जर्जरस्य प्रयोगे तु तुष्टा विघ्नविनायकाः ॥ ५२ ॥
तथा चार्यां प्रयुक्तायामुमा तुष्टा भवेदिह ।
रङ्गप्रयोगमाचर्यं तुष्टो भूतगणो भवेत ॥ ५३ ॥
आश्रावणादिचार्यन्तमेतद्दैवतपूजनम् ।
पूर्वरङ्गे मया ख्यातं तथा चाङ्गविकल्पनम् ॥ ५४ ॥
देवस्तुष्यति यो येन यस्य यन्मनसः प्रियम् ।
तत्तथा पूर्वरङ्गे तु मया प्रोक्तं द्विजोत्तमाः ॥ ५५ ॥
सर्वदैवतपूजार्हं सर्वदैवतपूजनम् ।
धन्यं यशस्यमायुष्यं पूर्वरङ्गप्रवर्तनम् ॥ ५६ ॥
दैत्यदानवतुष्ट्यर्थं सर्वेषां च दिवौकसाम् ।
निर्गीतानि सगीतानि पूर्वरङ्गकृतानि तु ॥ ५७ ॥
या विद्या यानि शिल्पानि या गतिर्यच्च चेष्टितम् ।
लोकालोकस्य जगतस्तदस्मिन् नाटकाश्रये ॥ ५८ ॥
निर्गीतानां सगीतानां वर्धमानस्य चैव हि ।
ध्रुवाविधाने वक्ष्यामि लक्षणं कर्म चैव हि ॥ ५९ ॥

APPENDIX II

Variations in readings as found in different MSS. procured after printing the text.

Page	Line	
1	3	तदुल्लासरसाकारां M 1.
		समुल्लासरसाकारां M 2.
	6	फलदां गुर्वीं M 1; M 2.
	12	अपृच्छत् M 1; M 2.
2	4	प्रकीर्णान् M 1.
		विकीर्णान् M 2.
	10	हकारान्ताः M 1.
	14	सरसानि च M 1; M 2.
	15	मनीषिणः M 1; M 2.
	18	पद्यगद्यात्मकं M 1; M 2.
3	3	उच्छ्वासलम्बकाध्यायं M 1.
		द्वयोः M 1; M 2.
	4	मिश्रमङ्कादिकं तत्स्यात् M 1.
4	4	पादादौ M 1; M 2.
	6	जात् M 1; M 2; U.
	7	शोभाशोभकरौ M 1.

Note: See the Preface for the abbreviations.

Page	Line	
	9	भयसुख M 1; M 2.
5	4	सर्वदा M 1.
	4	इति M 1; M 2.
	7	चरितैः M 1.
	9	कौतूहलेन विदुषां कोमरङ्कभीम M 1.
6	9	द्वयचित्रकृत् M 1.
	13	निष्ठः M 1.
	15	कोविदैः M 1.
	16	वलोकनात् M 1; M 2.
7	4	जातमप्यप M 1; M 2.
	20	तत्रोदाहरणं M 1; M 2.
	21	लक्ष्यते M 1; M 2.
8	6	यत्र वाच्यं M 1; M 2.
	15	दाशरथी M 1.
	20	शिवे M 1.
	21	ध्वनत्यत्र M 1; M 2.
9	7	विभाव्यते M 1.
11	7	व्यक्तिस्तु भाव्यते M 1.
	18	अनेकार्थाः M 2.
12	5	स्वस्वभावरसः M 1; M 2.
	6	स्वाभाविका रसाः M 1; M 2.
	12	यथायोग्यं M 1.
13	3	वक्ष्यते M 1; M 2.
	16	चित्तासक्तिर्मनःशङ्का M 1.
15	10	मुहुरिन्द्रिय M 2.
16	8	संचारिणः स्मृताः M 2.

Page	Line	
	14	अधमे चापहसितं M 2.
	20	करमर्पयेत्सुतं M 1.
17	22	सात्त्विका मताः M 2.
18	12	लज्जां विदधति यदमी M 1.
19	13	व्यङ्गक्षोणिपति M 1.
	17	पूर्वोत्तरार्धे व्यत्यस्ते पठिते M 2.
20	2	आस्यशब्दन M 2.
	19	शान्तिपदं M 1.
22	3	मान्यैरधिवेत्तुगण्ड M 1.
23	9	धीरशान्तोद्धतावपि M 1.
	12	अनहंकारः M 1.
24	3	सधीरललितो यथा M 2.
	11	माधवं तं M 1.
	14	मात्सर्यवान् धूर्तः M 1.
25	8	कुन्तलाधिपसुता M 1.
	20	स्तनतटी M 1.
26	16	गुणो यथा M 2.
	20	नेतुर्हास्यकरः M 2.
27	14	नोपलक्ष्यते M 2.
29	15	प्रणिहितश्च करः M 1.
	21	काञ्चीप्रदेशाम्बरा M 1.
30	4	मध्या तु M 1.
	17	किमु तेन M 2.
31	6	व्यापारयन्त्या M 2.
32	10	बन्धच्छलः M 1.
33	2	वपुषि वेपथुः M 1.

Page	Line	
34	5	अपरस्त्रिया M 1.
	7	स्खलत्कुसुमासु M 1.
	18	विगमभीताः M 1.
36	20	कान्तिनिबिडा M 2.
37	12	वस्तुयोगेऽपि M 1 ; M 2.
43	15	द्वित्रिपद् M 2.
	18	तारतारम् M 1.
45	19	रसातिरेक M 1.
46	14	पुण्याम्बुपूर्ण M 1.
48	7	तत्परिभूति M 1.
	19	उक्तिः संक्षिप्तरूपत्वात् M 1.
49	15	आक्रान्तरमणी G 1.
50	2	कारकं वा ज्ञापकं वा M 1 ; M 2.
51	17	प्रियतरालापैः M 2.
	18	Agrees with P.
52	2	रसौघभूतो रसवद्वचने रसवद्यथा M 1.
	3	Agrees with P. in reading अयं स etc. M 1.
	18	तद्वेणिकान्तस्पृशि M 2.
54	8	चञ्चलदृशः M 1.
	9	जडः सैन्यमबलाः G 1.
	20	अर्थः प्रतीयते M 2.
55	1	दलेक्षणे M 1.
	7	कल्लोला आन्दोलाः G 1.
56	8	प्राप्तैः सह कालागरुद्रुमैः M 2.
58	15	चूर्णनागदलपूगसंकुलं G 1.

Page	Line	
61	3	कृतिमच्छवर्णा G 1.
64	12	प्रेयान् केसर M 1.
72	6	नाद्यापि कलुषम् M 1.
	15	अधिमृदुकरतल्पं M 1.
74	18	वञ्चितसखी M 1.
75	3	स्तनदुर्गशैल M 1.
76	6	अभूतपूर्वोदय: M 2.
77	17	अप्रस्तुतमति M 1.
	18	तमालश्यामलाकारं M 2.
78	1	तल्लङ्घनोपयोगि स्यात् M 1.
79	17	प्रदानप्रचितोत्सव M 2.
80	8	इदं ब्रुवन्तु M 2.
81	3	इदं तद् दु:साधक्रमणपरमास्त्रं M 2.
82	16	विशेषोक्तिर्हि युज्यते M 2.
83	12	विरोध: स्वोक्तयोर्यथा M 1.
	18	मधुपश्रेणिशरण M 1.
84	3	व्रीडाकरो मत: स यथा M 2.
87	14	अहो धैर्यमहो शौर्यं M 2.
88	18	सिद्धा सा च M 2.

APPENDIX III

अलंकारसंग्रहकारिकार्धानामनुक्रमः

आ

इ

ख

द

प

र

ल

व

श

APPENDIX IV

उदाहृतश्लोकाः

अ		PAGE
अकुण्ठोत्कण्ठया पूर्ण	*काव्यप्रकाशे, ७-२०७ .	४९
अकृते तु वनावरोध	. . . .	१०२
अक्षं विक्षिपति	महानाटकम् ३-८१ . .	४६
अङ्कूरत्कुचमङ्गं	. . . .	२९
अङ्कूरत्कुचमप्यनल्प	. . . .	१४३
अङ्कोपान्तमुपाश्रितः	. . . .	४५
अणिसं पि मअरकेदू	. . . .	१४८
अणुमपि परकीयं	. . . .	५५
अतिविततगगन	*काव्यप्रकाशे ७-२५५ .	७८
अत्रान्तरे किमपि	मालतीमाधवम् १-२९ .	३८
अत्रिलोचनसंभूतः	*काव्यप्रकाशे ७-१५८ .	६६
अद्यापि स्तनशैल	महानाटकम् २-७ . .	७५
अद्यैव किं न विसृजेयं	वेणीसहारम् ५-३२ . .	११४
अधिकरतलतल्पं	*काव्यप्रकाशे, ७-२२३ .	७२
अनङ्गमङ्गलगृहापाङ्ग	,, ७-१४१ .	६२
अनञ्जितासिता दृष्टिः	काव्यादर्शः, २-२०१ .	४८
अनभ्यासेन विद्यानां	,, २-२४७ . .	६०

* This mark indicates that the stanza has been quoted in the work mentioned.

ब

APPENDIX V

विशेषपदानि

आ

ड

त

व